नं० ४२५४-घ

प्रश्नदीपिकादशमाध्यायः

पत्राणि ६३+२

नं० ४२५४-घ

नं० ४२५४-घ
शास्त्रदीपिका दशमाध्यायः
पत्राणि ६३+२

रुद्राध्यायः

श्रीगणेशाय नमः॥ ॥ विधेः प्रकरणान्तरेऽतिदेशात्सर्वकर्म स्यात्॥ ऊहे सिद्धे तिदिष्टानां बाधाभ्युच्चयचिं
तया॥ इयत्तादशमे गाणांविकृतिषु सिद्धीकृते॥ अति[illegible]ष्टपदार्थविषयत्वाद्बाधस्याप्यूहवदतिदेशोत्त
रकालमारंभः। ननूहबाधयोर्मिथो हेतुहेतुमत्ता। ऊहो नाम प्राकृतस्य प्रयोगस्यान्यथाभावः। न च तदधीनो बा
धः। तुषकलेषु त्ववघातस्य बाधः न च तत्रोहोऽस्ति। अननुष्ठानात्। न ह्यननुष्ठीयमानस्य प्रयोगविकारोऽस्ति य
त्र चोहो नीवारादौ न तत्र बाध इति विषयभेदात्तयोरन्योन्यहेतुहेतुमत्ता। यत्र हि द्रव्यान्तरे देवतान्तरे वा प्राकृत
प्रयोजनमस्ति तद्विषय ऊहः। यत्र तु नास्ति तत्र बाधः। सत्यमेवं तथाप्यूहस्य पदार्थगतरूपान्तरात्मकत्वेन पदार्थ
प्रत्यासन्नेस्तत्प्रथमं चिंतानन्तरं चिंता कृता। बाधस्तु तन्निवृत्त्यात्मकः पश्चाच्चिंत्यते। तत्र प्रथमं तावदिदं चिंत्यते किं
सर्वं प्राकृतं विकृतौ कर्तव्यं उत तत्र प्राकृतप्रयोजनं न कर्तव्यमिति। तदर्थमिदं विचार्यते किं प्राकृतमंगजातमंग
शास्त्रं वा स्वरूपेणैवानादृतप्रयोजनं विकृतावतिदिश्यते। सोऽयं णा[illegible]यं कथं आग्नेयस्य यान्यंगानि तानि
कृत्वेति। उत पदार्थकार्यापत्तिया निर्दिष्टादृष्टरूपाणि तद्व्रतासंपादनाय [illegible] आग्नेयादिगतो व्यापारः प६
सोऽतिदिश्यते। सोऽयं णानावयं कथं यथा [illegible]येन तथेति। तत्र पूर्वस्मिन्पक्षेऽतिदेशावगतानां गन्धावानां प
दार्थानां प्राकृतप्रयोजनानादरेण विकृतावेव यथासंभवं दृष्टादृष्टप्रयोजनकल्पनासंभवात्स्वयं दितेपि
बर्हिषि लवनमदृष्टार्थं तया कर्तव्यमिति नास्ति बाधः। उत्तरत्र तु प्राकृतस्य लवनकार्यस्य दृष्टस्य स्वयं
दितेर्बर्हिष्यभावेनानतिदेशाल्लवनस्वरूपस्य चानतिदेशान्न कर्तव्यं लवनमिति सिध्यति बाधः। तत्रोप
देशवदतिदेशोपि पदार्थस्वरूपैक एव मुख्य उपदेशानुरूपत्वात्तस्येति मन्वानः सर्वं कर्तव्यं न तु किंचिद्बाध्य। धि

दाम

ग्नप

तव्याभिस्याद्। सिद्धांतस्तु अपेक्षासन्नियोग्यत्वे रूपकारातिदेशानां। तदभावात्पदार्थानामतिदेशो न कल्प्यते। यागेन भा
वयेदिति हि यथा यागः फलसाधनं भवति तथा व्याप्रियेतेत्यर्थः। कथमिति केन व्यापारेण यागः फलसाधनतामापद्यत
इत्येवं यागस्य फलसामर्थ्यजनने व्यापारविशेषोपेक्षितः न तु व्यापारमात्रं येनावघातादिव्यापारः स्वरूपेणाति
दिश्येत। अवघातप्रयाजादिजन्यदृष्टादृष्टोपकारसंपादनेन तु भवति यागस्य फलसामर्थ्यजनने व्यापारः। तस्माद
पेक्षावशादुपकारसंपादनस्यैवातिदेशो न पदार्थानां। तथा सन्निधिरपि तस्यैव विकृतं वा कंचोदनासामान्येन प्राकृ
तं प्रधानवाक्यमुपस्थापयति। तच्च वाक्यं स्वार्थमुपस्थापयति। तस्य च स्वार्थोंऽशत्रयमनुक्ता भावना। तत्र साध्यसा
धनांशावनपेक्षितत्वादनादृत्य तृतीयोंऽशो गृह्यते। स चांगजन्योपकारसंपादनात्मा नांगस्वरूपात्मा। तथा कथमा
कांक्षापूरणयोग्यतापि यागगतव्यापारस्यैव नांगानां। तस्मादपेक्षासंनिधियोग्यत्वैः कार्याणामेवात्र पदार्थ
विशिष्टानामतिदेशः न पदार्थस्वरूपाणामपेक्षाघटनाबाल॥ एवं शास्त्रस्वरूपाणां। एवं च विशिष्टकार्यातिदेश
दार्थिको विशेषणानां पदार्थानामतिदेशः। न तत्र यस्यां विकृतौ यत्साकृतं कार्यं न संभवति तस्यां तस्यासंभवा
द्वानतिदेशान्नतदृशोन पदार्थप्राप्तिः। स्वरूपस्य नास्त्येवातिदेशः। तदिदमुक्तं लुप्तप्राकृतप्रयोजनं न चोदक
स्सादयतीति। यस्तु पदार्थानुरक्तं तदुपलक्षितमुपकारस्य स्वरूपमतिदिश्यते तस्य जनकापेक्षायां पदार्थाना
मपि पुनर्विकृत्य सूत्रेण तादर्थ्यादन्वयमिच्छति तन्मते लुप्तप्राकृतद्वाराणामपि तादर्थ्यावगमात्तदुपपत्तये द्वा
रांतरपरिकल्प्यानुष्ठानं स्यात्। पदार्थापोहेनैव स्वरूपमतिदिश्यताम्। किं तत्स्वरूपमतिदेष्टव्यं। न तावत्स्वकृ
त्युपकारव्यक्तिर्विकृतौ शक्या कर्तुं। तादृशस्तूपकारो नातिदिश्येत। तादृक्त्वं च न दर्शपूर्णमाससंबंधितया।

नहि विकृतौत संबंधितासं भवति। तेन प्रयाजादिमत्तयैव ताह[illegible]मिति तद्रूपातिदेशोर्थसिद्ध एव पदार्थानाम
तिदेशोपि विशिष्टविधिनैव विशेषणानां विधिरिति व्यर्थः पृथक्पदार्थातिदेशः। स्यान्मतं कारणं नेदं कार्यं नेदस्या
वश्यं न्ताया धस्यप्रयाजा[illegible]धीनमुपकारांतराद्या दृष्टं सर्वदर्शपूर्णमासोपकारेष्वनुवृत्तमुपकाररूपं तदतिदि
श्यत इति तथापि तत एव प्रयाजादिप्राप्तिः सिध्येत्। नहि तस्यान्यतउत्पत्तिसंभवः कारणं नेदं कार्यं नेदादि तित
येवोकत्वात्। तस्मादनर्थकोपि पदार्थातिदेशः। केवलमदृष्टबाधविघातायस्यादित्याक्रांतावत्। ननु समने विध्यं
तातिदेश इत्युक्तं विध्यंतस्य ब्राह्मणं। अतः कथमिह शास्त्रातिदेशो निक्रियते। उच्यते। कार्यातिदेशादार्थि रा६
को[illegible]ः शास्त्रातिदेशस्तदत्तिप्रायं तत्। अपि च। विध्यंतशब्देन प्राकृतस्य प्रधानविधेर्योतिमो शः स उच्यते। न च
स मिधो यजति व्रीहीन वहंतीति प्रत्यक्षश्रुतमात्रं प्रधानवाक्यशेषः किं तर्हि कल्पितकार्यवाचिशब्दसहितमी
दृशमंगशास्त्रमवघातेन वितुषीकुर्यादिति विरिति। तत श्चैवदशस्यैवातिदेशः ईदृशस्य च कृष्णलचरावतिदेशासं
न वा स्मिद्धो बाधः। तस्माल्लुप्तार्थानां प्रकृतिवत्कुर्यादित्येतावन्मात्रालोचनयाप्यारितिप्राप्तिमवगतामपि श्रां
तीकृत्यतद्वातिरिक्तां गतिविषयमतिदेशशास्त्रमुपसंह्रियते। तेन स्वयं दितं बर्हिर्भवतीत्यादौ लवनादयस्त
न्मंत्रास्तत्साधनभूताश्च परस्मादयो न प्रवर्तंते॥१॥ एवं वा॥ प्राजापत्यं घृते चरुं निर्वपेच्छतकृष्णलमायुष्कामइ
ति श्रूयते। तत्रावघातः कर्तव्यो नेति संशयः। चरुशब्दोऽत्र रोचरुधर्मविधानार्थं रूपाणव कर्तव्यइति विशेषाशंका
विनाप्यवघातेनालुप्तार्थैरेव धर्मैर्वैशद्येनचोपपन्नश्चरुशब्दो नावघातं प्रापयितुमलं। अपहतं लुप्त ते आपय
तीत्याहत्यविधानात्क्रियत इति वैषम्यं॥२॥ एवं वा॥ वेश्वदेवं चरुं निर्वपेत् इत्यत्र वान्ते बर्हिषदं कृत्वाश स्मया

व१ शं॥ तेन लुप्तार्थोप्यवघातो वचनात्

राम २

स्फ्येन च व्यूहे दिदमहममुं चामुं च व्यूहामीति यं द्विष्यात्तं ध्यायेत्। यदधो वमन्ये चेतयच्च स्फ्य आस्लिष्येत्तद्दि स्व
उरुक्रमायावघ्नतीति श्रूयते। तत्र संशयः। किं वैश्वदेविकदेवतावाहनकाले विस्तरेणावाहनं कर्त्तव्यं नेति। तत्र चो
दकप्राप्तेः कर्त्तव्यं कथं पुनश्चोदकप्राप्तिः नहीयं देवता प्राकृत्याः कृत्स्या श्च देवतायाः कार्यं वर्त्तते किं त्वप्राकृतकार्यं
यं। अतोस्या[illegible]पावदत्तरणा बर्हिषो ववर्हिर्ड्डमीनावाहनं प्राप्नोति। सत्यं वैश्वदेविकचोदके न तत्प्राप्नोतिस्वय
मेव त्वयं वैश्वदेवयाग औषधद्रव्यकत्वादेकदेवतात्वाच्चाग्नेयविकारः। तत्र वैश्वदेविकतंत्रमध्यपाता सर्वा एवंगा
निप्रसंगेनोपकुर्वंतीति न पृथक् क्रियंते। आवाहनं तु कृतार्थत्वात्कर्त्तव्यमिति प्राप्ते ब्रूमः। नैमित्तिकविधेर्निमि
त्तापेक्षत्वान्निमित्तस्य च स्फ्यस्यैव प्रादेरवश्यं भावाभावेन देवतावाहनकाले निश्चयासंभवादनिश्चितसद्भावमु
रुक्रमयागविधानेनावाहनं प्रयोक्तुं क्षमं। अविहितं चावाहनं कृतमपि निष्फलमेव। तस्मान्न कर्त्तव्यं॥३॥ ॥
दृष्टिरारंभसंयोगादंगभूतान्निवर्त्तेतारंभस्य प्रधानसंयोगात्॥ दर्शपूर्णमासयोरारंभणीयाङ्गतासा विकृतिष्व
पि कर्त्तव्येति द्वादशे वक्ष्यते। सा किं सोमांगभूतासु दीक्षणीयादिषु कर्त्तव्या नेति विचारः। कर्त्तव्या चोदकप्राप्ते
रिति प्राप्ते विधीयते॥ अंगभूतास्वियं तु सहारत्वान्न प्रवर्त्तते। आरप्स्यमानपुरुषसंस्कारार्थेयमिष्यते। नारं
भो दीक्षणीयादेः प्रधानारंभसिद्धितः। आरंभहारेणारंभणीयाप्रकृतावंगमासीत्। अतो विकृतिष्वपि तद्द्वारेव
प्राप्तिः। न चांगभूतासु दीक्षणीयादिष्विष्टिष्वात्मीय आरंभोस्ति। ज्योतिष्टोमे तावन्न कर्त्तव्या तस्या पूर्वत्वात्॥
दीक्षणीयादेश्च तस्यामवस्थायामप्राप्तावसरत्वात्। ज्योतिष्टोमे च प्रारंभोर्थादंगेष्वपि प्रवृत्तो भवति। प्रथ

मंच प्रवर्त्तेन मारंभः। तेन प्रधानार्थेनैवारंभेणांगानामारब्धत्वात्तेषां पृथगारंभोस्तीति तदंगत्वाभावात्तद्धा
रंभणीयानुप्रार्थत्वान्न कर्त्तव्या॥४॥ ॥प्रधानाङ्गान्यसंयुक्तात्सर्वारंभान्निवर्त्तेतानंगत्वात्॥ अथ यत्रैष्टि
कान्यन्यानि च कर्माणि सप्रधानान्येकफलसाधनत्वेन चोदितानि यथा राजसूये। तत्र किमेष्टिकेष्वारं
भणीयास्यान्न वेति। पूर्वाधिकरणे प्रधानविषय आरंभो नांगानामित्युक्तं इह सर्वेषां प्रधानत्वादिष्टीनामप्य
स्त्यारंभः। तेनानुप्रार्थत्वादारंभणीया कर्त्तव्येति प्राप्ते ब्रूमः। प्रकृतो हि यद्गमारंभणीयात द्विषय आरंभो दार
दर्शपूर्णमासावारप्स्यमान इति वचनात्। इह त्विष्टिपशुसोमानामेकप्रयोगाङ्गानामेकः सर्वेषु व्यासक्त आ
रंभो नेष्टिस्त्वर्यपदेष्टुं शक्यते अग्नीषोमीयहविर्विधिर्वाग्निना। तेनात्रापीष्टीनामात्मीयारंभानाभावानुप्रार्थ्यैवा
३ रंभणीया॥५॥ तस्यां तु सर्वस्य याजवत्॥ किमारंभणीयायामारंभणीया कर्त्तव्या नेति संशयः। नन्वंगत्वे तेयं दर्श
पूर्णमासयोः। अतो दीक्षणीयादिवदस्यां न कर्त्तव्या तस्माद्कृतार्थमेतत्। उच्यते। सत्यमंगभूता तथापि पृथगा
रंभाद्भवति न प्रधानारंभेण सिध्यति। न ह्यस्यां वेलायामारब्धौ दर्शपूर्णमासौ तयोरारप्स्यमानयोरेषा वि
हिता। यदि चारब्धौ न वेतौ ततश्चारंभणीयैव न कर्त्तव्या सद्धि कर्त्तारमारंभयोग्यं कर्त्तुं क्रियते तौ चेदारब्धौ कि
मर्था सा तस्मादारप्स्यमानयोर्दर्शपूर्णमासयोः क्रियमाणेयं पृथगारंभानुवर्ती त्वनुप्रार्थत्वादस्यामारंभ
णीया कर्त्तव्या। नैवं। अशक्यासावृत्तिदेष्टुं। सा हीदानीं विधीयते न तस्या दर्शपूर्णमासांगत्वं ज्ञातं। यच्च प्रकृ राम
तावज्ज्ञातं न तद्धि कृतावतिदेष्टुं शक्यं न तदेकमेव वाक्यमविहितवद्दर्शपूर्णमासयोरंगं विदधाति। विहि ३
तवच्चातिदिश्यतीति न कथंचिदेव कल्प्यते। तस्मान्न ह्यातिरिक्तेति कर्त्तव्यताऽतिदिश्यते॥६॥ कर्मवद्व्यासंयो

अध्रप्राधं
इध्यानाग
घता २

गार्थमर्थान्नावाप्निवर्त्तेत तादर्थ्यश्रुतिसंयोगात्। साद्यस्के श्रूयते खलेवाली यूपो भवतीति। प्रकृतौ चास्ति
यूपाहुतिः यूपमंछेष्यता होतव्यमिति। सा किं खलेवाल्यां कर्त्तव्या नेति संशये ऽतिदेशप्राप्तेः कर्त्तव्येति प्रा
प्ते लुप्तार्थत्वादकर्त्तव्येत्याह। कथं। यूपमच्छेष्यता होतव्यमिति छेदनार्थो होमः। न च खलेवाल्यां छेदनमस्ति
। स्वदेशावस्थितायामेव तस्यां पशुर्बध्यते। अतस्तत्र न यूपाहुतिः कर्त्तव्या ॥७॥ ॥ स्थाणौ तु देशमात्रत्वादनि
वृत्तिः प्रतीयेत ॥ तत्रैव स्थाणावाहुतिं जुहोतीति। सा किं यस्मिन्कस्मिंश्चित्स्थाणावारादुपकारकत्वेन कर्त्तव्या स
ती खलेवाल्यामपि स्यात् किं वा यूपाव्रश्चनस्थाणौ कर्त्तव्या तद्द्वारेण यूपस्यैव संस्कारार्था सती खलेवाल्या
मावश्चनस्थाणावभावेन लुप्तार्थत्वादकर्त्तव्येति विचारे यूपवियोजिते स्थाणौ क्रियमाणा तद्द्वारेण न शक्ता
ति यूपस्योपकर्त्तुं। तस्मादारादुपकारिका खलेवाल्यां कर्त्तव्येति प्राप्ते ब्रूमः। आव्रश्चनस्थाणोः सन्निधाना
त्तद्द्वारेण च संस्कारत्वे संभवत्यारादुपकारकत्वानुपपत्तेर्यूपसंस्कारार्थेयं वियोजितेपि स्थाणौ यूपीयोसा
वित्येव क्रियमाणा शक्नोत्येव यूपस्योपकर्त्तुं देवदत्तधारिता याद्व स्रजः शुचिदेशनिधानं देवदत्तस्य यद्य
पि नादृष्ट एव संस्कारस्तथापि संस्कारत्वमेव संबद्धोपकारित्वलाभादसंबद्धोपकारिण आरादुपकारज्या
यः। तस्मात्खलेवाल्यां न कर्त्तव्या ॥८॥ प्रयाजे च तन्न्यायत्वात् ॥ अस्ति दर्शपूर्णमासयोरुत्तमः प्रयाजः स्वाहा
कारं यजतीति। स किमारादुपकारक उतान्याजादिषु यक्ष्यमाणानामग्न्यादिदेवतानां संस्कारक इति त
दर्थमिदं विचार्यते। किं स्वाहाकारं यजतीति देवताविधिरुत नामधेयं स्वाहाग्निं स्वाहा सोममित्यादि

धान्यमातारं जननीं च मातरशब्दो वदन्न्यधाद्यर्थे
स्तथाग्न्यादिशब्दोपीत्यर्थः ।५

मंत्रवर्णा देवताविधिरिति। तत्रावचनाद्देवतालाभे न मंत्रात्कल्पनं क्षमं। तस्याश्चानुपयोगित्वाद्वेदाराद्दुप
क्रिया। न ह्यवचनविहितदेवतासंबंधे स्वाहाग्नि[illegible]स्वाहा सोममित्यादिनात कल्पना युक्ता। न चायं मं
त्रः करणत्वेन स्कृत्या विधीयते यतस्तद्गतानामग्न्यादीनां देवतात्वं कल्प्यते। क्रमप्रकरणविनियोज्यो ह्यसो।
न चाग्न्यादिप्रतिपादकस्य मंत्रस्याविज्ञातदेवत्वे याग
न वा विज्ञातसामर्थ्यस्ता भ्यां विनियोक्तुं शक्यते। न वाग्न्यादिशब्दानां मात्रशब्दवद्दृष्ट्या कथं
सामर्थ्यमवगम्यते। तेनानेन च नित्यं देवताविधानमाश्रित्य तत्रैवार्थ्यादिशब्दानां मात्रशब्दवद्दृष्ट्या कथं
चिद्वृत्तिरंगीकर्तव्या। अतो न मांत्रवर्णिकी देवतेत्याराद्दुपकारकः। किंच। न चायं स्वाहाकारो मंत्रे वर्णात्कल्प मंत्रेस्वा
ते कल्प्यपि तुं तेन स्वाहाकारदेवताकयागविधानमिदं। न च स्वाहाकारस्यादेवतान्यत्रोपयोगिनी या संस्क्रि हैत्यस्य
येत। तस्मादाराद्दुपकारकमिदं कर्मेति प्राप्तमुच्यते। न देवताविधौ शक्तिर्हि तीयां तस्य विद्यते। न च यागवि वोक्त
धौ क्षीणो विधत्ते देवतां विधिः। न ह्येकार्थविधिसंभवे ऽनेकार्थविधिर्युक्तः संभवति चात्र याग मात्रवि वात् ६
धानं। स्वाहाकारशब्दस्य स्वाहाग्निमित्यादिमंत्रसंबंधेन नामधेयत्वसंभ[illegible]वात्। [illegible]करणत्वं च क्रमस
हितात्प्रकरणाल्लभ्यते मंत्रस्य। न चासामर्थ्यं निश्चितं येन विनियोगो न स्यात्। संभवति यागे देवताप्रतिपाद
कस्य मंत्रस्य प्रकाशन सामर्थ्यं। यदि यागो यं न स्याद्यागोपि वा देवतां तर युक्तः स्यात्ततो ग्न्यादिवचनं स्यात् सा
मर्थ्यं निश्चीयते न त्वेतदस्ति। तस्माद्योग्यतास्तीत्यविहतो विनियोगः। न च द्वितीयस्य देवताविधौ सामर्थ्यं लभ्य राम
ते मंत्रवर्णाद्देवताविधिरिति नागत्वादेवताविध्याश्रयणं। मंत्रे चाज्यनागादिषु यक्ष्यमाणा देवता यथाक्रमे ४
णकीर्त्यमानाः प्रत्यभिज्ञायं तद्इतितासां स्मरणं दृष्टमेव प्रयोजनमिति नादृष्टार्थकल्पना। तस्माद्विकृति

तिर यांर ४स्यमंत्र४

षुसोमार्यादिष्वग्न्यादिपदानि लुप्तार्थत्वान्निवर्त्तन्ते ॥ ९ ॥ तथाज्यभागाग्निरपीति चेत् ॥ दर्शपूर्णमासयोराज्य
भागौ समाम्नायेते आज्यभागावग्नीषोमाभ्यां यजतीति । सोयमाग्नेय आज्यभागः स किं प्रधानदेवताया
अग्नेः संस्कारक उतारादुपकारक इति पूर्वेण न्यायेन संस्कारकत्वे प्राप्त उच्यते । निगदेष्वावाहनादिषु अग्निमाव
ह सोममावह अग्निमावहेत्येवमग्निशब्दस्य द्विः पाठाद्देवतान्तरं गम्यते । सोमाच्च पूर्वं पठ्यमानोऽग्निस्ततः पर
भाविनः प्रधानाग्नेरन्य इति गम्यते । विधिवाक्ये चाग्नीषोमाभ्यां यजतीत्येकेन पदेनाग्निः सोमश्च विधीयते ।
तत्र सप्तमे वयागं प्रतिगुणत्वं सोमस्य । अन्यत्र देवतात्वाभावात् । तत्र यद्यग्निः प्रधानं स्यात्ततो वैरूप्यं स्या
त्सोमापेक्षयाज्यभागाविति द्युदिश्याग्नीषोमाभ्यामित्युपादेयमग्न्यपेक्षया तद्विपरीतमिति वचनव्यक्तिभे
दात् । तस्मादग्निरपि यागांगत्वेन विधीयते । यागस्तु प्रधानकर्म्मारादुपकारकः । तेन सोमादिषु नाग्निर्नि
वर्त्तते । अग्नीषोमीयादि[illegible]विकारेष्वप्याग्नेयाज्यभागो दृश्यते ॥ १० ॥ पशावपीति चेत् ॥ अग्नीषोमीयप
शुपुरोडाशः अग्नीषोमीयस्य वपया प्रचर्याग्नीषोमीयं पशुपुरोडाशमनुनिर्वपतीति स किं पशोरारादुपका
रकः उत पशुदेवतासंस्कारक इति [illegible] संदेहे पशो[illegible]पुरोडाशे विपरीतमिति । उभयत्राप्येकैव देवतो
पादीयत इति न संस्कारकत्वं । आसोमं वद्धत्यग्निनापतितिष्ठतीति वाक्यशेषात् लुप्ता सोमः प्रणीयमानोऽग्निश्च
पशौ देवता पुरोडाशे तु न नियोगतः स्तावेवेति प्रमाणमस्ति । तस्मादारादुपकारकः पशुपुरोडाशः । नैवं । दृष्टे सम्भ
रणसंस्कारे सति नादृष्टकल्पना । पशुधर्मेष्वसंदंशात्तदंगत्वं सुनिश्चितं । ज्योतिष्टोमांगं हि पशुर्न पुरोडाश
४x पुरोडाशे चोभयत्रापि तद्धितनिर्देशात् [illegible] भक्तादेवता गुणत्वेन ग
म्यते । न च गृह्यते विशेषः । पशोर्देवतां ग[illegible] । x४

स्तु पशुधर्ममध्ये विधीयमानस्तदंगं संस्कृत देवतासंस्कारे ॥ दृष्टेनोपकुर्वन्नादृष्टार्थतामालंबते। अतो
नागृह्यमाणविशेषत्वं। तेनैव पशौ देवतात्वताभान्यावासेव पुरोडाशेन संस्कर्तव्येति विकृतिषु देवतांतर
वती षगनीषोमौ निवर्तेते॥११॥ ॥चरुर्हविर्विकारः स्याद्विज्या संयोगात्॥ सोऽयं चरुं निर्वपेदित्यत्र संशयः।
किं स्थालीवचनश्चरुशब्द उतौदनवचन इति यदापि स्थालीवचनस्तदापि किं स्थाली कपालविकारा ह
विः श्रपणार्था उत पुरोडाशस्य हविषो विकारः प्रदेयेति। तत्र स्थाल्यां लोकप्रसिद्धेस्तद्वचनत्वं। यस्तु या
ज्ञिकानामोदने प्रयोगः स स्थालीसंबंधाल्लाक्षणिकः। न च विपरीतं संभवति ओदनमात्रे प्रयोगाभावा
देव। येपि तस्यौदनवचनत्वं मन्यंते तेपि न तन्मात्रं वाच्यमाहुः कपाले कटाहे वा। अपि तस्यैदन्तस्यैव त
च्यत्वानभ्युपगमात्। तथा चोपरितनेऽधिकरणे वक्ष्यामः। तेन स्थालीसंबंधनिमित्तएवौदनेपि चरुशब्द इ
ति विशेषणात्स्थाल्येवाभिधेया। सा चानदनीयादहविष्यायोग्या। श्रपणयोग्यतानुप्रसिद्धैव। तस्मा
त्स्थाली चरुः कपालविकारश्च सोऽयमिति स्थाल्यां अपि तस्य हविषः स्वर्यसंबंधात्स्थाल्येवाभिधीय
ते। तस्येदमिति तद्धितो भविष्यतीत्येकः पक्षः। गृह्णीमस्तस्थालीचरुरिति स तु हविर्विकारः सोऽयमिति
देवतासंयोगात्। देवतातद्धितो ह्ययं अन्यथा यागस्वार्थे न स्यात्। वचनाच्चानदनीयेनापि कृष्णलादिना
यागः क्रियते। तस्माद्धविर्विकार इति द्वितीयः। सत्यं चरुर्हविर्विकारः ननु स्थाल्यां चरुशब्दः किं त्वोदने चरुश राम
ब्दस्य वैदिकयाज्ञिकप्रयोगेचौदनवचनत्वावधारणात्। वेदे तावदादित्यः प्रायणीयश्चरुरित्युक्तो अदितिमोद ५

ने नेति पश्चादनुवादादोदनवचनत्वं तत्रतावद्द्रावेवगम्यतइत्युक्तं शास्त्रस्यार्थ तन्निमित्तत्वादित्यत्र। त
तस्मान्नेकार्थत्वमन्याय्यमिति सर्वत्रैवोदनवचनत्वं। याज्ञिकाश्चानवस्रावितान्तरूष्मपक्वौदनेचरुशब्द
मुपचरंति। तेषांचशब्दैकगम्यधर्मव्यवहारिणांशब्दार्थाविप्लवेतात्पर्यातिशयात्स्वयगृनेभ्यःप्रत्ययि
ततरत्वात्सएवशब्दार्थः। पाकविशेषनिमित्तश्चौदनेचरुशब्दः। नचस्थालीमंतरेणासपाकोनिर्वर्तत इति क
त्वात्स्थाल्यादरः। ननुतावतास्थालीवचनत्वं। तस्माद्दोदनेनहविर्विक्रियते॥१२॥ ॥ सकपालेप्रकृत्यास्यादन्य
स्यचाश्रुतत्वात्॥ सएषचरुः किंकपालेपक्तव्यउतनयत्रक्वचिदुतस्थाल्यामिति संशयः। चोदकप्राप्तेकपालेस्या
त्। प्रकृतौहिकपालोष्मणाहविः पाकोनिर्वर्त्यते। चरुस्तूदकगतोष्मणापक्तव्यः। तच्चकपालमुदकधारणा
र्थमुपादीयमानमप्राकृतकार्यंस्यादितिनचोदकानुग्रहः। तस्माद्यत्रक्वचित्पक्तव्य इतिप्राप्ते ब्रूमः। स्थाल्या
मेवस्यात्। तस्यांहिचरुत्वनिमित्तः पाकोनिर्वर्त्यतेनान्यत्र। तस्मात्स्थाल्यांस्यात्। यद्योदनवचनेपिचरुशब्द
स्यात्स्थाल्यामेवपाकस्ततः पूर्वाधिकरणेस्थालीकपालविकारइतिपक्षस्यौदनेनहविर्विक्रियतइतिपक्षस्य
चकोनुप्रत्नेविशेषः। उच्यते यथाविस्थाल्यांपक्वस्यहविस्त्वादित्याशंक्यतस्मिन्नेषणामनर्थकं[illegible]स्यादित्या
दिभिः सूत्रैः प्रयोजनमुच्यते। स्थाल्याहिकपालेनिवर्त्तितेपिचोदकप्राप्तः पुरोडाशः एवस्थाल्यांश्रपितोहवि
ःस्यात्। ननक्षपेषणसंयवनोपधानादिनिवर्त्तेतानिस्पृः। सिद्धांतेत्वोदनेतेषामर्थलोपादकरणं। एवंप्रयो
जनस्त्वाणिव्याख्यायपुनरधिकरणांतरत्वेनव्याख्यानंतवान्। योनामचरावपिसंवादवद्धातवत्पेषणा
१४ नन्वेषलपरिच्छिन्नंकपालंचोदकेनप्राप्नोति। नचचरौ[illegible]रुषेरेस्तुकपालेषुशाक्यः प
तत्वसंभवान्निवर्त्यते। ननुतन्निवर्त्यो[illegible]कपालमपिनिवर्त्तितुमर्हति। तस्मात्कपा

दीनि कर्त्तव्यानीति मन्यते तस्य बुद्धिर्मंद विषन्यायेन व्यावर्त्यते। प्रयोजनप्रमुखत्वात्तेषां चरोश्चरत द्व्यावादक
रणं च षणे संयवनोपधानादीनां।७ पधानं तु याज्ञिकाः कपालोपधानकाले तेनैव मंत्रेण स्थाल्याः कुर्वते।
न च स्थाली कपालकार्ये वर्त्तते उदकधारणार्थत्वात्। अतउपधानस्यस्याप्रवृत्त्या आसादनमप्यर्थकृतत्वा
न्न चोदकेन प्राप्यते॥१२॥ ॥इति शास्त्रदीपिकायां दशमाध्यायस्य प्रथमः पादः॥ ॥ कृष्णलेष्वर्थलोपा
द् पाकः स्यात्॥ प्राजापत्यं घृते चरुं निर्वपेच्छतकृष्णलमायुष्कामः इत्यत्र संशयः। किं कृष्णलेषु पाकः कर्त्त
व्यो नेति। लुप्तार्थत्वादकर्त्तव्यः। ननु घृते श्रपयतीति वचनात्कर्त्तव्यः। न। अशक्यत्वात्। रूपरसादीनां सर्वे
षां तिरोभावो द्रवीणां च प्रादुर्भावः पाकः। अतो न हि कृष्णलेषु संभवति पाकः। तस्मादकर्त्तव्य इति प्राप्ते ब्रूमः।
यद्यपि मुख्यः पाको न संभवति तथापि लक्षणया तापमात्रं वचनेन विधीयते। अतस्तावन्मात्रं कर्त्तव्यं अन्यथा
वचनानर्थक्यं स्यात्। यदि त्वयमेव मुख्यः पाको यदनुष्णस्पर्शस्य द्रव्यस्योष्णीकरणं ततः सुतरां वचनबला
द् सत्यपि प्राकृते कर्त्तव्यः॥१॥ ॥उपस्तरणाभिघारणयोरमृतार्थत्वादकर्म स्यात्॥ कृष्णलचरावेव संदेहः
किमुपस्तरणाभिघारणे कर्त्तव्ये नेति। चोदकप्राप्तेः कर्त्तव्ये। यदुपस्तृणात्यभिघारयत्यमृतत्वं तेनैतं करो
तीति वचनात् स्वादिमार्थे ते। न च कृष्णलेषु स्वादिमा संभवति। अतो लुप्तार्थत्वादकर्त्तव्ये इति चेत्। न अर्थवा
दत्वादमृताकृतिवचनस्य। एवं तर्हि चतुरवत्तसंपत्त्यर्थमुपस्तरणाभिघारणे तत्तु चत्वारि वचनादि कृष्णला
न्यवद्यति चतुरवत्तस्यासादिति कृष्णलचतुष्टयेनैव चतुरवत्तत्वादिति वचनादकर्त्तव्ये। नैवं। न हि कृष्णल

अनेनैव न्यायेनैककपाले सर्वहोमान्न च पर्वार्थं चाप्युपस्तरणाभिघारणयोश्चतुरवत्तसंपत्त्यर्थत्वे सकृदुपस्तरणं द्विरभिघारणं च नैत्तिरीयस्त्रुचो के पूर्वपक्षे भवति । सिद्धान्ते तु सकृत्स्यैककपालस्य रूपत्वेन सा च्यु संस्रवेण ...

चतुर्थेनावदानचतुष्टमाप्तुं शक्यं विषयत्वे दात्तं । आप्तिवचनं त्वर्थवादमात्रं । यदि कृत्स्नलचतुर्थे नैव चतुरवत्तमोप्यते ततः सकृदेवत्ते रवतद्वाप्तेर्न ह्यवदानमपि स्यात् । तत्र चत्वारि चत्वारीति वीप्सानावकल्प्येत । अथवीप्सार्थो विधीयते ततः प्राप्तावदानानुवादेन चतुःसंख्याया वीप्साया श्च विधानाद्वाक्यं भिद्येत । ननु द्विर्हविषोवघतीत्यस्य प्रकृतित्वः प्राप्तेर्ह्यवदाने स्यात् । न । चतुरवत्तसंपत्त्यर्थं हि प्रकृतो ह्यवदानमुपस्तरणाभिघारणवत् । तच्चेदन्यतः संपन्नं ततो ह्यवदानमप्युपस्तरणाभिघारणावदेव निवर्त्तितुमर्हति । तस्मादर्थवादमात्रमाप्तिवचनमिति कर्तव्यमुपस्तरणाभिघारणमिति प्राप्तम् उच्यते । सूक्ष्माणां पुरोडाशशकलानां स्कन्न्यसंसक्तानामाहवनीयपातः कथं स्यादित्येवमुपस्तरणाभिघारणं दृष्टार्थं । न च कृत्स्नलानां संसक्तिः संभवतीत्यत्परिहारायोपस्तरणादि न वेत् । ननु चतुरवत्तिसंपत्तिरपि दृष्टमेव प्रयोजनं । न । अनंगत्वात् । चतुरवत्तं ज्जुहोतीत्यनावत्तं जुहोतीत्येतावद्विधीयते चतुःशब्दस्तूपस्तरणाभिघारणह्यवदानवचनप्राप्तचतुःसंख्यानुवादमात्रं न विध्यर्थं । अवत्तहोमविधिपरत्वाद्वाक्यस्य । तस्मादकर्तव्यमुपस्तरणाभिघारणं ॥२॥ ॥लक्षाणां कुप्रीत्यर्थत्वाद कर्मं स्यात् ॥ हत्वाचिन्तेयं । यदा प्रकृतौ लक्षाः पुरुषप्रीत्यर्थास्तदा कृत्स्नलानामस्ति लक्षो नेति । तत्र कृत्स्नलैर्लक्ष्यमाणैर्न प्रीतिर्नवनिते न प्राकृतास्ताव द्भक्षाल्लुप्तार्थत्वाद कर्तव्याः । यत्तु वचनैश्चुकूबाकारं लक्षयतीति तदन्यस्य नक्षणं विधत्ते तस्यादनीयत्वात् । चु... बाकारस्यानुवादसंभवा ... कृत्स्नलानां । तस्मान्नतेषां लक्षणमिति प्राप्ते ब्रूमः । पूर्ववाक्ये कृत्स्नलानां प्राधान्यादाज्यस्य च तदंगत्वात्तेषामेव लक्षणवाक्ये न्वयः । तेषां चावदनीयानामपि पदो

आज्यपस्पृष्टते चरु निर्वपेत् ... माधुकाम ९

ब्रू २ ... श्यामाकानिरवपत : २

नचतु ४ रूसाचितो घाटनेतु अस्यतो स्य स्य प्राप्त लक्षानुवादे न हं तथा ऽ नास्याव
मात्रमचलं

नवङ्कक्षणमपि वचनाद्भविष्यतीति तेषामेव चतु[illegible]षाकरणविशिष्टं नक्षणं विधीयते॥३॥ ॥एकधोपहारः
सहत्वं ब्रह्म नक्षाणां प्रकृतौ विहतत्वात्॥ तत्रैव श्रूयते एकधा ब्रह्मणउपहरतीति किमत्र सकृत्वं सहृत्वं वा
विधीयते उत सहत्वमिति। कश्चात्र विशेषः। यदि सकृत्वं विधीयते तत नमोदकप्राप्तानामिडाप्राशित्र चतु
र्धाकरण शंयुवाककाल नक्षाणां कालभेदे[illegible]हरणे प्राप्ते सकृद्धरति नाधिकमिति विधानादेकएवास्य नक्ष
उपसंहर्तव्यः नक्षांतराणि निवर्तेरन्। सहत्वविधौ पुनर निर्वर्तिता नक्षाः कालभेदे नोपहर्तव्याः प्राप्ताः संतः एक लप
स्मिन्काल उपह्रियंते। तत्र सकृत्वे सहत्वे चैकधाशब्दस्य लोके प्रयोगादनियमः। यत एवायं साधारणः अत एव
चोदकप्राप्तलक्षांतराबा[illegible]धायसहत्वमेव विधीयते। प्राशित्रमिडामिति द्वितीयया क्रियां प्रति नक्षस्य प्राधान्या
वगमाददृष्टार्थत्वाच्च नत्वतिपत्त्यर्थाः प्राकृताः नक्षाः कृत्स्नलेषपि चोदकेन प्राप्नुवंतीति तेषां सहत्वविधानमुपप
द्यते॥४॥ ॥सर्वत्वं च तेषामधिकारात्स्यात्॥ तत्रैव सर्वं ब्रह्मणे परिहरतीति श्रूयते। तत्र संशयः। किं ब्रह्मभागस्य स
र्वस्य परिहारो विधीयते यद्ब्रह्मणो सर्वं तत्परिहरतीति यद्ब्रह्मणे परिह्रि[illegible]ति सर्वमिति वा। उत परिहरणीयस्य स
र्वस्य ब्रह्मसंबंधो विधीयते यत्परिहरति तत्सर्वं ब्रह्मणे नाध्वर्यो रित्यद्इति पुरुषांतरेभ्यो नक्षो पनीयत इति॥
तत्र चोदकप्राप्तपुरुषांतरसंबंधोमाबाधीति ब्रह्मभागस्य परिहर्तव्यस्य सर्वता सर्वस्य ब्रह्मसंबंधिनो वा परि रा
हारो विधीयत इति मन्यते। वचनं त्वेवमनर्थकं स्यात्। प्रकृतित एव हि कृत्स्नस्य ब्रह्मभागस्य नक्षणाय परिह
रणं प्राप्तमेव कृत्स्नो हि भागस्तेन नक्षणीयः अन्यथा सेन रक्षितस्यांशस्य संस्कारहानिः स्यात्। तस्मात्प्राप्त लाले

ब्रह्मणागस्य हस्तेनान विधातव्या। तेन यत्प्राकृते नामापुरुषेभ्यो रक्षार्थं हरति तत्सर्वं ब्रह्मणोपरिहरति
नान्येभ्य इति प्राकृता रक्षाः पुरुषांतरेभ्यो पनीयंते ॥५॥ पुरुषापनयास्त्वकालत्वं। सर्वे रक्षोब्रह्मण उपहर्त्त
व्या स्तत्त्वेकधा ब्रह्मण उपहरतीति सहत्वविधानादेकस्मिन्नेव काल उपहर्त्तव्या इति स्थिते संशयः। किं युगप
दुपहृतानां युगपद्रक्षणमुत प्रकृतिवन्नानाकालं रक्षणं। तत्र। रक्षार्थं ह्युपहारो तो रक्षोपि युगपद् वेत्।
सहाप्युपहृतो शक्यं यथाकालं तु रक्षणं। तस्माच्चोदकाबाधाय सहोपहृतानामपि प्रकृतिवन्नानाकालं रक्ष तोप प
णं॥६॥ ॥एकार्थत्वादविभागः स्यात्॥ प्रकृतौ चतुर्धाकरणं विधायेदं ब्रह्मण इदं होतुरित्यादिव्यादेशो
विहितः स किं दृष्टस्थलेषु कर्त्तव्यो नेति। चोदकप्राप्तेः कर्त्तव्यः। नैवं। चतुर्धाकरणं तावच्चतुर्णां रक्षार्थं प्रवृ
त्तं। इह तु ब्रह्मणैव सर्वं रक्षयितव्यमिति तु स्वार्थत्वाद कर्त्तव्यं। व्यपदेशोपि चतुर्णां व्यवस्थार्थ इह तु सर्वस्य
ब्रह्मसंबंधित्वेन निश्चितत्वादिदं ब्रह्मण इत्यपि निर्देशो न कर्त्तव्यो नतरामिदं होतुरित्यादि होत्रादिभ्योपनी
तत्वात्॥७॥ ॥ऋत्विग्दानं धर्ममात्रं स्यादृष्टार्थ इति सामर्थ्यात्॥ ऋत्विग्भ्यो दक्षिणां दद्यादित्यादिपदैर्विहितं तद
दृष्टार्थमानत्यर्थं वेति संदेहे दृष्टार्थमिति ब्रूमः। दानकर्त्तव्यताश्रुत्यादानेनानतिकर्त्तव्यतावाक्यात्। नचादृ
ष्टत्वं। तस्माद्दानमात्रं कर्त्तव्यं। किंच द्वादशशतादिपरिमाणानियमो मंत्रादीतिकर्त्तव्यता कर्मानुरूपत्वेनुरूपद्र
व्यता च दानस्यादृष्टार्थत्वेव कल्प्यते नान्यथा। कर्मकरेभ्यस्तु दीयमानमपेक्षितानतिहारेण दृष्टमयो ज्ञानत्वा
न्न शक्यतेऽदृष्टार्थं कल्पयितुं। परिमाणादिनियमस्तु कामं स्यात्तत्त्वदृष्टार्थः न तु तावता दानस्याप्यदृष्टार्थता। त
स्यो

४न१ नननैवन्यायेन चतुर्द्धाकरणस्य कृत्स्नार्थतो ह्यातत्ती यदि न तु न्यून्याय स्याकृतार्थे लेसन आह स्थिते ति तिते
भक्षाभावो निरस्तः इह तु भक्षे सति किं परि क्रयार्थं प्रतिपत्त्यर्थो वेति चिंतनादगतार्थतेति ४

स्मात्सत्रेपुकर्त्तव्यं दानं॥ ८॥ ॥शेषभक्षाश्च तद्वत्॥ शेषभक्षा इडादिविषया दर्शपूर्णमासयोः सोमविषयाश्च सो
मे समाम्नाताः किं परिक्रयार्था उत प्रतिपत्त्यर्था इति विचारः। तत्र भक्षणमीतिः प्रीत्या चानतिः प्रत्यक्षा। तस्मात्तद
र्थाः। नैवं। यागकृते वशिष्टं द्रव्यं प्रतिपत्तिमपेक्षमाणं भक्षणेन प्रतिपाद्यते तत्रदृष्टमेव प्रयोजनं। अग्नीशानस्य य
जमानो देवतायै संकल्पितस्यातो नशक्नोत्यसौ तेन परिक्रेतुं। तस्मात्प्रतिपत्त्यर्था भक्षाः। स्थिते चास्मिन्भक्षाणां प्र
तिपत्त्यर्थत्वे चतुर्धाकरणे भक्षणाश्च वर्णस्य परिक्रयमाशंक्य भक्षार्थता व्यादेशस्य हती ये साधिता। तस्मात्सत्रे
ष्वप्यबाध्या भक्षाः॥ ९॥ वरणमत्विजामानमनार्थत्वात्सत्रे न स्यात्स्वकर्मत्वात्॥ ज्योतिष्टोमे वरणमृत्विजा
माम्नातं। अग्निर्होता स मे होतेत्यादि तत्सत्रेषु कर्तव्यं नेति संशये चोदकानुग्रहाय कर्त्तव्यं। मा त्विक्कार्थं चेदं प्र
कृतौ तच्च सत्रेपि यजमाने बाधा तव्यं। ये यजमानास्त ऋत्विज इति वचनात्। अतो लुप्तार्थत्वात्कर्त्तव्यं वरणं। नै
वं। आनत्यर्थं तत्प्रकृतौ। न चात्र यजुमानैर्वरणेनानमितव्यं। अतोर्थलोपादकर्तव्यं। ऋत्विक्कर्मपि यागकर्तृ
त्वं तच्च प्रकृतौ वरणविधानान्न हूयेणानतानामेवेन विगुणमृत्विक्कर्मत्वादि च न विष्यति। यदि तु कर्मकरत्वव
नोयमृत्विक्कुशब्दस्ततो वरणेनापि यजमाने प्रशक्य माधातुं। न हि स्वार्थं कुर्वाणान कर्म करा एवं तितेनान्नत्विजि
त्वसत्रे कर्त्तव्यमिति वरणनिवृत्तिः॥ १०॥ ॥परिक्रयश्च तादर्थ्यात्॥ दक्षिणादानं परिक्रयार्थं नादृष्टार्थमित्युक्तमि
दानीं परिक्रय एव सत्रे किं कर्त्तव्यो नेति संशये पूर्वाधिकरणवत्पूर्वोत्तरपक्षौ। नात्र गोदीयत इत्यादि प्रतिषेधो ना
स्त्यां दातव्याप्तो घटते। तस्मादनिरुक्तं दानमिति विशेषाशंका विध्यंते शेषस्त्वयमनुवादो न प्राप्तिं सूचयति। त
स्मादानमनार्थत्वाद्वरणवत्परिक्रयोपि निवर्त्तते॥ ११॥ उद्वसानीयः स त्वधर्मीतदं गत्वा तत्र दानं धर्ममात्रं स्या
। मन्त्रेषु वरणस्यार्थलोपान्निवर्तनरणा नामेव ६ अदक्षिणानि सत्राणि कृ विक्रयत्र

इत्यमृत्विक्वादिना चोतेन सत्रेष्वृत्विगादि ... मानुगतं वरण ... मात्रेनि
मित्ततमुच्यते तोममात्र ... यानुगमाय वरणानतगत्यमनार्थ ... कर्त्तव्यस्य ... कुरु इत्याज्ञा दिश

त्वात्सत्रादुदवसायस्योति स्तोमेन पृष्ठशमनीयेन सहस्रदक्षिणेन यजेरन्निति श्रूयते। तत्र संशयः। किं
पृष्ठशमनीयः सत्रांगं तत्र च सत्रवद्यजमानैरेवार्त्विज्यं कर्त्तव्यमिति दक्षिणादानमदृष्टार्थं उत नांगमृत्विग्भिः
कर्त्तव्यं परिक्रयार्थं च दानमिति। तत्र। फलवत्सत्रसमभिव्याहारात् [illegible] दुत्तरकाले पि श्रूयमाणः पृष्ठशम
नीयो वाजपेयस्येव बृहस्पतिसवः सत्रस्यांगं इति स्यात्। किं सत्रसंयोगः काललक्षणार्थः स्यात्। फलं च कल्प्ये
त। तस्मादंगं। नैवं। उदवसानं हि त्यागः स च निःशेषसमाप्तावेव कल्प्यते। [illegible]। न
च निःशेषसमाप्तस्यांगं संभवति। वाजपेये नेष्टेति तु प्रयोगसमाप्तिर्गम्यते। समाप्तेपि च यथोक्तयोगे सं
भवसंगांतरे। त्यक्तस्य तु पुनरंगं न संभवति संभवे वा त्याग एव न स्यात्। तस्मादुदवसायेति त्यागस्य श्रु
त्वादनंगत्वं। न च लक्षणा। श्रौतमेव सत्रावसानं निमित्तीकृत्य पृष्ठशमनीयविधानात्।।१२।। तेषां तु वचना
द्द्वियज्ञवत्सहप्रयोगः स्यात्।। पृष्ठशमनीय एव संशयः। किमुदवसायिभिः सहप्रयोक्तव्य उत ते केकशः पृथग्यजे
रन्निति। तत्राख्यातोपात्तस्य बहुत्वस्योपादेयकर्तृगामित्वेन विवक्षितत्वात् संहत्य कुर्युरिति। स्थितं ताव
दपर्यवसितमंतराचिंतांतरं क्रियते।।१३।। तत्रान्यानृत्विजो वृणीरन्। यदा संहत्य कर्त्तव्यं तदा किं यजमानैरे
व कर्त्तव्यमुतर्त्विग्भिरिति विचारः। तत्रोदवसाने यजमानानामेव कर्तृत्वात्क्त्वाप्रत्ययेन च पृष्ठशमनीयस्य
तत्समानकर्तृकत्वात्तत्रापि यजमाना एव कर्त्तारो नान्य इति प्राप्ते ब्रूमः। यजेरन्नित्यनेन न यो व्यापारोऽभिधीयते त
स्यैवोदवसानसमानकर्तृकता क्त्वाप्रत्ययादवगम्यते नार्त्विज्यस्य। ननु पुरुषांतरैः प्रकृतिवत्क्रियमाणं

ननु सत्रावस्थाविशेषरूपे सर्वपक्षिणो भिन्नतेउदवसाने सत्रमासीरन्निति वकुत्वविधेः संहत्य कर्त्तृत्वात्समानकर्त्तृक याजत्र एक
शमनीयस्य तेनापि संहत्य कर्त्तृत्वं स्कायलोदवस्यादित्यत आह उदवसाने चेति। अविशाद उत्कारी सोदवसानस्य संहत्य कर्त्तृत्वं प्राप्नुप

न के नचिद्विरुध्यते। किंच दक्षिणाशब्दः परिक्रयार्थे वर्त्तते। न चात्र परिक्रयः संभवति। अतो दक्षिणाश्रुतिब
लाद्दन्ये भवेयुः। यद्येवमंगत्वेपि दक्षिणाश्रुतेरेवान्ये सिध्येयुः ये यजमानास्त ऋत्विज इति साधारणं वच
नं पृष्ठ्यशमनीयवर्जं भविष्यति तत्राह त्यपरिक्रयवचनात्। भवतु नामैवं को दोषः। किमर्थं तस्यांगत्व
निराकरणं उच्यते। अंगत्वाभ्युपगमे नापि शक्यत एव परिक्रयार्थतां वक्तुं तथापि तत्त्वत उत्तरं विवक्षि
तांगत्वमेव नास्तीत्युक्तं। अपि चांगत्वे सति संहत्य प्रयोगः स्यात् प्रधानवत्। एकैकशस्तु प्रयोगं वक्तुका
मोंगत्वं निराकृतवान्। तस्मादन्ये वरीतव्याः॥ १४॥ ॥स्थितादुत्तरं। नैतदस्ति संहत्य प्रयोग इति यदि ब
हुत्वं विधीयेत ततएवं स्यात्। उदवसायेति तु क्त्वा प्रत्ययादुदवसान समानकर्तृकत्वावगमादुदवसा
ने च बहूनां कर्तृत्वात्साम मे वबहुत्वं न विधीयते न चाविहितमंगं भवति। उदवसाने वगम्यमानम
पि बहुत्वं निमित्तवदुद्देश्यगतत्वाददविवक्षितं यागे चानुवादत्वादनंगं। किंच। उदवसाने निरपेक्षाः कर्त्तार
स्तद्यदि यागे निरपेक्षास्ततः समानकर्तृकत्वं संभवेन्नान्यथा। तस्मादेकैकश्येन प्रयुंजीरन्॥ १५॥ ॥का
मेष्टौ च दानशब्दात्॥ सारस्वते सत्रे श्रूयते प्लाक्षं प्रस्रवणं प्राप्याग्नये कामायाष्टाकपालं निर्वपंति। तस्या
मश्वां च पुरुषीं च धेनुके दद्युरिति। किमिदं दानमदृष्टार्थमुत परिक्रयार्थमिति। तदर्थं चिंत्यते। किमेत
स्यामृत्विजः संत्युत यजमाना एवेयमिष्टिः कर्त्तव्येति। तत्र द्वादशाहे यजमानास्त ऋत्विज इति यजमानानामा
र्त्विज्यमिहातिदेशेन प्राप्यमाणं प्राकृतेष्वंगेषु प्राप्यते नापूर्वांगेषु यूपावटस्तरणाबर्हिर्विबर्हिर्धे
योतुद्देश्यत्वान्नद्विशेषणत्वेनाविवक्षितत्वं ... × सचाधिरुह्य प्रजासत्रावस्था अत उदवसानेस
त्राः दस्यं तन्निन्ने नबहुत्वं गम्यलेन नरोविवक्षितं न तमोस्थोक्ता समानकर्त्तृकत्वेन यागे तत्त्वः प्रसक्तं सत्रे संहत्य कर्त्तृ

9

र्माः। तेनात्र सर्वाङ्गे कामेष्टौ असति यजमानानामृत्विक्त्वे चोदकप्राप्तैर्ऋत्विग्भिर्न वितव्यं। सत्सु च तेषु दानमसत्यपि
दक्षिणाशब्दे दृष्टार्थमेवेति प्राप्ते ब्रूमः। मस्तु नो बर्हिर्धर्माः प्रदिष्टानां पदार्थानामङ्गत्वाद्युक्तं यददृष्टं वै पुनस्त
वन्ति। यजमानास्तु कर्त्तारः प्रयोगाङ्गत्वाद्धि सतावपि प्रयोगद्वारेण प्राप्नुवन्ति। तस्मिंश्च प्रयोगे यददृष्टमप्यङ्गं नि
नं ४ पततीति तत्तैरेव प्रसंगसिद्धत्वान्नक [illegible] तरमाकांक्षति। तस्माद्दृष्टार्थमेव तद्दानं।१६॥ द्वेष्ये वा चोदनाद्दक्षिणा
पनयः स्यात्॥ दर्शपूर्णमासयोः श्रूयते। यदि प[illegible] संयाज्यन्त कपालमष्टिं जुहुयाद्वैश्वानरं द्वादशकपालं निर्व
पेत्तस्यै कहायनी गौर्दक्षिणा तां सह द्वेष्याय दद्यादिति। किमिदं दानं परिक्रयार्थमुतादृष्टार्थमिति। दक्षिणाशब्दा
त्परिक्रयार्थमिति। यद्यपि च दर्शपूर्णमासयोरेव नैमित्तिकमङ्गं वैश्वानरेष्टिस्तत्र मध्य एव क्रियते तथापि क्वचनो
दक्षिणानन्तरं नानुपपन्नं। उच्यते। द्वेष्यायतद्दानं न चर्त्विग्द्वेष्यः संभवति ऋत्विगाचार्यो नातिचरितव्य इति
स्मरणात्। तस्मादनृत्विजे दानमिदमदृष्टार्थं दक्षिणाशब्दः [illegible] दानमात्रेण त्वावर्त्तते॥१७॥ अस्थियज्ञोऽविप्र अ ६
धादितरेषां स्याद्धि प्रतिषेधादस्थ्नां॥ इदं श्रूयते। यदि सत्राय संदीक्षितानां प्रमीयेत तं दग्ध्वा [illegible] नेस्थी
कनिष्ठः ८ न्युपनह्य योस्य नेदिष्ठः स्यात्तं तस्य स्थाने दीक्षयित्वा तेन सह यजेरन्। ततः संवत्सरेस्थीनि याजयेयुरिति। यो
यं संवत्सरे स्थियागः स विचार्यते। किमस्थिशब्देन शरीरशरीरिणोरन्ते दोपचारात्प्रेतं लक्षयित्वा तस्यायं
याग उच्यते। तदधिकारे च यागे सत्रिणामितरेषामृत्विक्स्थानीयानां कर्त्तृत्वमात्रं उतास्थिशब्देन जीवत्स्व
सत्रिणोस्थि सहायान् लक्षयित्वा तेषामेव यागविधिरिति। तत्रास्थिशब्दस्य तच्छरीरे पुंसि प्रवृत्तेरितरेषां

लक्षणावश्यंभावे स्थिमतोन्तरंगत्वा [illegible] हिरंगानां द्यपर्व: ७ प्रतिद्ध

चैवाप्यंत परस्मैपदनिर्देशात्परार्थे कर्मणि याजयितृत्वावगमान्मताधिकारमिदं कर्म सत्रमध्यमरणनिमि
त्तं तस्यैव फलदमिति प्राप्ते ब्रूमः। न कथंचिदपि मृतस्य साक्षाद्वा संविधानाद्वा कर्तृत्वं संभवति। न चाकर्तुर
धिकारः॥ तस्माज्जीवतामेवायं यागः। याजयन्ति च ये तेषां याजयितारस्तदृत्विक्प्रायेण भविष्यति॥१८॥ य
दि तु वचनात्तेषां जपसंस्कारमर्थलुप्तं सेवितदर्थत्वात्। जीवदधिकारपक्षे चोदकप्राप्तेन किंचिद्बाधितव्यं
मताधिकारे तु संभवति केषांचिद्बाधः। न दिदृक्षुत्वाचिंतया किं वाध्यं किं नेति चिंत्यते। ये यजमानजपा व
पनादयश्च संस्कारा दीक्षणीयेष्टिश्च ते किमस्यधिकारपक्षे कर्तव्या नेति। चोदकानुग्रहाय कर्तव्याः।
मैवं। दीक्षार्था हीष्टिर्यमनियमसंकल्पश्च दीक्षा न च सा मृतस्य संभवति। तस्माल्लुप्तार्था। वपनं तु द्रष्टा प
संकेशश्मश्रुणोरभावात्। जपश्चाशक्यत्वात्॥१९॥ ॥क्रत्वर्थं तु क्रियते गुणभूतत्वात्॥ अथ यत्र यजमा
नो गुणभूतः यथा स्तुक्रंयजमानोऽन्वारभत इत्यादौ तत्कर्तव्यं नेति। तस्माल्लुप्तार्था। वपनं तु अचेतनानाम
स्थानां खातं च लक्षणकर्तृत्वासंभवादकर्तव्यं। न चैतन्यापेक्षं कर्तृत्वं काष्ठादीनामपि ज्वलनादौ कर्तृत्व
त्। यस्यैवान्यानपेक्षया स्वातंत्र्येण व्यापारसमवायसंभवः स एव कर्ता। तस्मात्क्रान्वारंभणादिकर्मि
स्थित्विः कर्तव्यं॥२०॥ काम्यानि तु न विद्यंते कामाज्ञानाद्यथेतरस्यानुच्यमानानि॥ गुणकामानां विवृतौ
प्रवृत्तिं तत्त्वाचिंत्यते। यदि कामयेत वर्षुकः पर्जन्यः स्यान्नीचैः सदो मिनुयादित्यादयो गुणकामा मृताधि राम
कारपक्षे प्रवर्त्तंते नेति। चोदकप्राप्तेः प्रवर्तंते। नैवं। कुतः कामाज्ञानात्। न हीदं ज्ञायते किं मृतस्येष्टं नवेति। १०

नव४

स्पर्शं

पापीयान् दरिद्रः। लक्ष्मीमदेनाकार्यकरणान्निर्वीर्यः तस्य दारिद्र्यकामनापि संभवत्येव॥

इदं च काम्यिकफलं करणे धर्मेणवत्यादितिता... यायिकरणस्य पूर्वोत्तरपक्षयोः प्रयोजनमात्रं कथनं। अतएवात्र तत्रत्यसिद्धान्ते तु प्रधान

तस्मादप्रवृत्तिर्गुणकामानां॥२१॥ ईहार्थाश्चानावास्यूक्तवाकवत्॥ सूक्तवाकगतान्यायुराशास्तत्वादीनि
फलपदानि प्रवर्त्तन्ते नेति संशये सूक्तवाकस्य प्रयोगाङ्गतया नित्यवत्प्रवृत्तेस्तन्निबंधनानामायुरादिपदा
नामपि प्रवृत्तिः। नैवं। फलनिर्देशाद्धि तेभ्यो मांत्रवर्णिकफलकल्पनात्। न च मृतस्य फलाशंसनं गम्यत इत्युक्तं। अ
तो लुप्तार्थत्वादेषां निवृत्तिः॥२२॥ स्युर्वा होतृकामाः॥ प्रकृतौ तु संति होतृकामाः यं कामयेत पापीयान् स्यादि
ति नीचैस्तरां तस्य याज्याया वषट्कुर्याद्यं कामयेत वसीयान् स्यादिति उच्चैस्तरां तस्य याज्याया वषट्कुर्यादित्या
दयस्तेन मृताधिकारेऽपि कर्मणि होतृकामनासंभवान्न निवर्तेरन्। निवृत्तिर्वा। यजमानफलमेव ह्यत्रापि निर्दि
श्यते। न चानिष्टं फलं भवति न च मृतस्येच्छा विज्ञायते। तस्मादेवमादीनामपि निवृत्तिः॥२३॥ सर्वस्वारस्या
घ दिष्टगतौ समापनं न विद्यते कर्मणो [illegible] जीवसंयोगात्। सर्वस्वारो नामैकाहः स्वर्गकामस्य विहितः।
तत्रार्भवस्तोत्रे काले ब्राह्मणाः समापयत मे यज्ञमिति प्रैषमृत्विग्भ्यः प्रदाय यजमानो म्रियते तस्मिन्मृते
शेषं कर्म समापनीयं नेति संशये न समाप्यं मृतस्य कर्तृत्वासंभवात्। यजमानस्य तावत्समाप्तिः कर्त्तव्या।
यच्च यजमानस्य कार्यं तदृत्विजः कुर्वंति नान्यत्। तस्मादृत्विजोऽपि न समापयेयुः। उच्यते। यद्यपि संजीविकर्तृत्वं
तत एवं भवेदिदं। जीवन्निव तु स प्रैषाद्धि इष्टकर्तृत्वमृच्छति। वरणं वरणादि समाचरणमेव जीवदवस्थायाम
पि यजमानस्य कर्तृत्वं। तच्च मरणोत्तरं नाविन्यपि कर्मशेषे जीवावस्थायामिव संविधानेन संभवति। प्रत्यक्ष
मेव च समापयतेति प्रैषेण समाप्तिश्चोद्यमाना न शक्यते परिहर्तुं। नहि ब्राह्मणानां गगनाद्विधः प्रैषस्य क

ननु मरणकामो यस्तेन न यजेतेति विधेर्मरणमेवात्र फलं तज्जातमेवेति यर्थसमापनं स्यात आह २ | नन्वाचार्यानां ते त्वमीमाग्निहोत्र विधेस्ता दुत्तराश्चिष्टि पुरुषः तसं योगोपपत्तिरिति तत्र आह न च प्र

क्रिया विशेषः। न हि प्रैषप्रेषकस्य स्वातंत्र्येण पौरुषेयत्वाद्दोषः स्यात्। प्रयोक्तृत्वमात्रं तु ब्राह्मणगतेष्टिवद् विधिषु प्रैषेष्वपि पुरुषाणां। अतः प्रत्यक्षमेव विहितं समापनं स्वर्गे एव चात्र मरणेनार्थितः फलं न मरणं मरणकामश्च संगीकृतमरण इत्यर्थः। तेनयोः स्वर्गं ज्ञात्वा स्वर्गं प्राप्नवानीति कामयते तस्यायं क्रतुः। तथा च हरिस्त्रिरुक्तं। प्रधानस्य मरणेनार्थिनः इत्यां प्रकल्पयतीति। तेन संजातेऽपि मरणे स्वर्गार्थमेव समापनीयं ॥२४॥ मरणे कर्मास्थियज्ञवत् ॥ ॥ अथ म्रियमाने कर्म [illegible] शेषे क्रियमाणे किं बाध्यं किं वा नेति प्रश्ने नैवोपक्रमः। तत्रोत्तरं। अस्थि[illegible]यज्ञे स्यान्न मधिकारपक्षे यथोक्तं तथेहापि द्रष्टव्यं ॥२५॥ जीवत्यध्वन मायुराशिषस्तदर्थत्वात् ॥ सर्वस्यैव मरणात्प्रागेव जीवद्दवस्थायामायुराशास्तीत्यायुराशीर्वक्तव्याने तिसंशयः। तत्र मरणाभ्युपगमेन प्ररत्तस्य नाशास्तितव्यमायुः। प्रागपि त्वार्नेव कालान्मरणासंभवात् तथा सति क्रतौ वैगुण्याद्याविदार्नेव कालमाशास्तितव्यमायुः। तस्मादायुराशीर्वक्तव्या ॥२६॥ क्रियास्यात् धर्ममात्राणां। यत्स्वकृतावानर्थम त्विग्वरणं दक्षिणादानं च न तत्र स्यादित्युक्तं। पत्नद्दृष्टार्थम तु याज्यावरणमात्रे यायदि रणप दानं च तत्सत्रेपि कर्त्तव्यमिति प्रत्युदाहरणमात्रमेतत्। २७॥ गुणलोपे च मुख्यस्य ॥ दर्शपूर्णमासयोरग्निहोत्रहवण्या हवीषि निर्वपतीति श्रुतो निर्वापः पवमानेष्टिषु वादके न प्राप्तः कर्त्तव्यो नेति संशये न कर्त्तव्यः कस्मात्। अग्निहोत्रहवण्याभावे निर्वापो विगुणत्वादकर्त्तव्य इति प्राप्ते [illegible] ब्रूमः। अति देशेन हि कार्यमुखेन पदार्थेषु प्राप्यमाणेषु हविः संस्कारार्थं तया निर्वापः प्राप्यते।

तसंयोगसंभवादि कृतोन एप भावात्। सत्यामपि [illegible] कृतत्वाद्यग्निहोत्रहवण्या। न च प वमाने
दर्शावि न पर्वपक्षमाह अ ष्टिवेलायामग्निहोत्रकृतं संभवति। विनो चाग्निहोत्रहव २
ग्नीति॥२

प्रमाणत्वात्तत्र निर्वापप्राप्तिरसंभवाच्चेत्तत्साधनं बाधेत दृष्टप्रसक्तौ साधनांतराक्षेपो युक्तः इति भावः

तदंगभूतानि होत्रहवणाप्रसंख्यान्यप्राप्यते। न चाप्राप्तायागुणत्वं। अतस्तदभावेप्य विगुणत्वात्क
र्तव्य एव निर्वापः॥२८॥ मुष्टिलोपात्संख्यालोपस्तद्गुणत्वात्स्यात्॥ वाजपेये श्रूयते। बार्हस्पत्यो नैवारः
सप्तदशशरावः क्षीरे चरुर्भवतीति। अस्ति तु प्रकृतौ चतुरो मुष्टीन्निर्वपतीति चतुःसंख्या मुष्टिद्रव्यं च। तदु
भयमिह चोदकेन प्राप्तं। न च चतुर्भिर्मुष्टिभिः सप्तदशशरावपरिमाणश्चरुः संपादयितुं शक्यते। अतोव
श्यं बाधितव्ये सति किमुभयं बाधितव्यं शरावद्रव्येण मुष्टिद्रव्यं सप्तदशसंख्यया च चतुःसंख्या। किं वान्य
तरत्। तत्रापि किमनियमः अथवा मुष्ट्यनुग्रहः संख्यालोपः विपरीतं वेति। तत्राविशेषादुभयोर्बाधः। तत्रा
पि समानकार्यत्वाद्द्रव्यं द्रव्येण संख्या संख्ययेत्येकः पक्षः। सप्तदशसंख्या शरावपरिमाणं च यागद्रव्यांगं
चतुःसंख्या मुष्टिश्च निर्वापांगं। अतो न तावत्साक्षादेकविषयत्वं येनोभयमुभयेन बाध्येत चतुर्भिर्मुष्टिभिः
सप्तदशशरावश्चरुर्न संपादयितुं शक्यत इत्यर्थाद्बाधः। न चैकबाधेनोपपत्तौ नोभयबाधनं युक्तं तस्मा
दन्यतरबाधः तत्राविशेषादनियम इति द्वितीयः। संख्याया द्रव्यांगत्वात्प्रधानस्य मुष्टिद्रव्यस्यानुग्रहः संख्या
यास्तु बाध इति तृतीयः। न संख्याया मुष्ट्यंगत्वं। वाक्यलक्षणेन सामानाधिकरण्येन द्रव्यसंबंधबाधे न द्वितीयाश्रु
त्या निर्वापांगत्वावगमादुभयोरपि क्रियांगत्वावगमात्तुल्यत्वं। तत्र मुख्यत्वात्संख्यानुग्रहो जघन्यत्वाच्च मुष्टि
लोप इति सिद्धांतः॥२९॥ औत्पत्तिके तु द्रव्यतो विकारः स्यादकार्यत्वात्॥ द्यावापृथिव्यां धेनुमालभेत वायव्यं वत्स

मेऽश्मयमिति गोद्रव्यासाधारणगुणवचने पृषेन्वादिशब्दे श्रुतेषु चोदकप्राप्तमजद्रव्यं प्रवर्त्तते नेति संश
यः। तत्र यद्यपि गोरसाधारणं गुणमेते वदन्ति तथापि न गोर्वाचकाः। तेनात्र गोर्नोपदेशेन नातिदेशेन प्राप्तिः। अ वार
जस्त्वतिदेशेन प्राप्यते। तत्रैव पृषेन्वादिशब्दा लक्षणया वर्त्तन्ते यथा जमप्यनमित्यादिष्विति प्राप्ते ब्रूमः। नानुमा
१२ निकचोदकानुरोधेन श्रुतानां शब्दानां लक्षणावृत्तिर्न्याय्या। तेन यद्यपि गोद्रव्यं न शाब्दं तथापि श्रुतगुणवि
शेषसंपादनाय गौरेवालब्धव्यः। चोदकप्राप्तं त्वजद्रव्यं प्रत्यक्षश्रुतगुणविशेषविरोधान्न प्राप्यते। ३०। नैमि
त्तिके तु कार्यत्वात्प्राकृते स्यात्तदापत्तेः॥ यस्तु साधारणगुणवचनः श्वेतादिशब्दो वायव्यं श्वेतमालभेतेति स
चोदकप्राप्तेऽप्यजे संभवतीति न तत्राजस्य बाधनमिति प्रत्युदाहरणमेतत्। ३१। विप्रतिषेधे तद्वचनात्प्राकृत
गुणलोपः स्यात्तेन च कर्मसंयोगात्। साद्यस्के श्रूयते खलेवाली यूपो भवतीति। तत्र संशयः। किं चोदकप्राप्तं खा
दिरादिकं यूपं छेदनादिभिः कृत्वा खलेवाली कर्त्तव्यः। यूपः खलेवाली भवतीति वचनव्यक्तिरुत यैवोत्तरवे
दिमध्ये खले पूर्वावस्थिता खादिरी वा खादिरी वा खलेवाली तस्यामेव पशुनियोजनं कर्त्तव्यं। खलेवाली स यू
पो भवति यूपकार्यकरी भवतीति वचनव्यक्तिरिति। तथा चित्राया मिष्टौ श्रूयते दधि मधु घृतं धाना उदकं तंडुला पयो ४
स्तत्संसृष्टं प्राजापत्यमिति। तत्रापि चोदकप्राप्ता ब्रीह्यवघातादिभिस्तंडुलीकर्त्तव्या उत तत्र ब्रैह्यब्रैह्यावालोक राम
सिद्धास्तंडुला ग्रहीतव्या इति। तत्र चोदकानुग्रहाय यूपस्य खलेवालीत्वं ब्रीहीणां च तंडुलत्वं। यथा सिद्धोपादा ९२
ने हि चोदकप्राप्ताः खादिरादयो ब्रीहयस्तत्संस्काराश्च छेदनावघातादयो बाध्येरन्। किं च खलेवालीयूप

४४ रीवा खलेवाली यूपकार्यं कुर्यात्। तंडुलाश्च यथासिद्धा एवोपादेयाः। प्रकृ
तौ हि अपलविधानात् प्रकृति ४   अवघातेर्लक्षणतादि ८

३५

कार्ये भवतीति विधेयो यूपशब्दस्य यूपेन तत्कार्यं करे यजमानशब्दस्येव प्रस्तरे गौणी वृत्तिः स्यात् यूपस्य
तु खले वाली त्वविधो न गौणत्वं। तस्मात् तत्वदिरादयः खलेवाली कर्त्तव्याः व्रीहयश्च तंडुलीकर्त्तव्या इति
प्राप्ते ब्रूमः। यूपस्य खलेवालीत्वमदृष्टार्थं विधीयते। खलेवाल्यास्तु यूपत्वं दृष्टार्थं पश्वनपक्रमात्। तस्मा
द्यथासिद्धैव खादिरखादिद्रव्यमुपादाय स्वयमेवहविः कर्त्तव्यं। विकृतावपि यत्तु पणं चर्वादौ तत्रापि प्र
तिद्रव्यं गृहीत्वा स्वयमेवहविः कर्त्तव्यं तंडुलेषु अपणस्यार्थी जावान्निहन्तो न अपणं कर्त्तव्यता वले न प्रकृतिद्र
व्यप्राप्तिः। प्राप्तेव प्रकृतिद्रव्योपादाने व्रीहियवनियमः। तस्माल्लोकसिद्धौ तंडुला व्रैहा अव्रैहा वा ग्र   ए.व.६
हीतव्याः। ३२। परेषां प्रतिषेधः स्यात्॥ यथासिद्धखलेवाल्याद्युपादानात् खादिरादिकात्वं बाध्यमिति स्थि
तं। अथच्छेदन तक्षणादयः संस्काराः कर्त्तव्या नेति संदेहे चोदकानुग्रहाच्छक्यत्वाच्च कर्त्तव्याः। प्रयोजना
भावान्न कर्त्तव्याः। छिन्नाहि खलेवाली तक्षणी भूतानि खातोच्छितातस्याः छेदनं तक्षणं निखननमुच्छ्र
यणं च लुप्तार्थमकर्त्तव्यं॥३३॥ अर्थाभावे संस्कारार्थत्वं स्यात्। अथ यत्सूर्यं दहणपरिवृंहणं परिषेचनादि
खलेवाल्यां संभवत्प्रयोजनं यच्चादृष्टार्थं अंजनप्रोक्षणादि तत् खलेवाल्यां भवति नेति संशये न भ
वतीति ब्रूमः। कुतः। यूपार्थत्वात्तेषां। इह चायूपे खलेवाल्यां यूपकार्यकरणाल्लुप्तार्थं पर्यूहणादि
न कर्त्तव्यं। उच्यते। न यूपो नाम कः कश्चिदर्थोस्ति यदर्थाः संस्काराः किंतु छेदनप्रोक्षणादिजन्यदृष्टादृ
ष्टरूपाः संस्काराः काष्ठे वर्त्तमाना यूपशब्दाभिधेया नियोजनस्याग न्त ताः। तत्र केषांचिल्लुप्तार्थानां

दिघपीति दृष्टांतवैषम्यमाह तंडुलेष्विति बाध ... पर्यूहणं मेघावरुणदंडेन भूमेः समक्रिया परिवृंहणं बल्लावदानं
... कुट्टनारब्धप्रयोजनदार्ढ्यं प्रोक्षणादी सादिशब्देन परिग्राणं ५

लोपेप्यन्येषामनुष्ठानार्थानां १ ना ४ सक्तं ३
प्र तवत्वा ३

निवृत्तौ नास्तिप्रमाणं तस्मात्पर्यूहणं जननादयः कर्त्तव्याः ॥ २४ ॥ अर्थेन च विपर्यासे तादर्थ्यात्तत्त्वमे
व स्यात् । महापितृयज्ञे श्रूयते सोमाय पितृमते पुरोडाशं षट्कपालं निर्वपति पितृभ्यो बर्हिषद्भ्यो धा
भर्जिता नाः पितृभ्योऽग्निष्वात्तेभ्योऽभिवान्यायै दुग्धे मंथमिति । तत्र धानासु हन्तिः कर्त्तव्यो नेति संशये विघाता
यवाः ३ दकर्त्तव्यः । क्रियमाणे हि हन्तौ धानात्वं विहन्येत न सक्तवो भवेयुः । तस्मादकर्त्तव्यो ऽवघातः । सत्यं श्रप
णोत्तरकाले क्रियमाणे विघातः स्यात्पूर्वं तु हन्तिं कृत्वा पश्चात्पाकः क्रियते क्रममात्रं बाधित्वा । तथा न
६ धि विहन्यते । न हि क्रमबाधे पदार्थोपि बाधितव्यः । तदुक्तं । गुणलोपे च मुख्यस्य क्रिया स्यादिति । तस्मात्कर्त्त
व्यो ऽवघात इत्येवं प्राप्ते कारेणाधिकरणं व्याख्यातं । तदिदमनुपपन्नं प्रकृतावपि सर्वमवघातस्ततः
पाकः । तेन नास्ति क्रमविपर्यासः । पुनरुक्तं च गुणलोपे मुख्यस्येत्यनेन न्यायेन । येनापि तु न क्रमो नामक
श्चिद्गुणः पदार्थव्यतिरिक्तोस्ति । यस्य पृथग्बाधं व्यवस्थापयामः । पदार्था एव हि विततां प्रतीयन्ते । तेन क्रे
3 केवलस्य क्रमस्य बाधासंभवात्तद्बाधे पदार्थोपि बाधितव्य इत्यवघातो न कर्त्तव्य इत्येतन्निराकरणार्थ
मिदमधिकरणं । यत्तु विपर्यासो नास्तीति तत्राप्युच्यते । धानासु श्रपणं कृत्वावघातः प्रकृतौ च विप
रीतमित्यस्ति विपर्यास इति । यदि विपर्यासः कथं तर्ह्यवघातानुष्ठानं । न हि क्रमस्य पृथग्बाधः संभव राम
ति । सत्यं न तत्र परमार्थतः क्रमबाधः प्रकृतौ हि श्रुतेष्वेव व्रीहिष्ववघातः कृतः । अत्रापि श्रुतास्वेव धा १३
नास्विति नास्ति क्रमविपर्यासः । प्रकृतावघातात्परं श्रपणमिह तु विपरीतमित्येतावता विपर्यास

वाचोयुक्तिः। ननु धानावस्थायां हतिः क्रियमाणो विघातं कुर्यात्। यथा न विघातो भवति तथा कु
र्महे। सकृदेवानभ्यस्तमवहननं क्रियते न च न विष्यति विघात इति। तदयुक्तं। संभवति हि पृथक्क्र
मस्य बाधः। तदेव हि पदार्था अन्येनान्येन च क्रमेणानुष्ठातुं शक्यंते। तेन क्रमस्यापाकृतस्याभावेपि प
दार्थो न निवर्त्तते। यत्तु स्वरूपणं कृत्वावघात इति तत्पूर्वं हंति कृत्वा पाकः कार्य इति भाष्यविरुद्धं। यदपि
अपणोत्तरकालेप्यवघातविपर्यासो नास्ति श्रुते द्व्येवघातकरणादिति। तदप्यसारं। प्रकृतौ हि
द्वैद्व्यश्रवणे पुरोडाशश्रवणं व्रीहिश्रवणं च। तत्र धानादेवतासंबंधात्पुरोडाशकार्यवर्त्तनेन व्री
हिकार्यं। प्रकृतौ च व्रीहिविषयोवघातो न पुरोडाशविषयः। तेन धानास्वपि चोदकप्राप्तेषु व्रीहिषु
एवावघातो न धानावस्थायां। तत्र तु क्रियमाणे हंतो क्रमविपर्यासः स्यादेव॥ धानासु चावघातक
रणे धानात्वं विहन्येत। यत्तु सकृदेवावहनिष्याम इति। तथा सत्यप्राकृतकार्यमवहननं स्यात्। प्र
कृतिवत्तु तुषविमोकार्थो वघातः क्रियमाणो धानात्वं विहन्यात्। तस्मान्नैवमधिकरणं युक्तमि
ति यथा वार्त्तिके व्याख्यास्यामः। न धाना उदाहरणं। तत्रैव मंथ उदाहरणं। तत्रापि तंस्त्रपणोत्तरकाल
मर्थाद्भवति तत्र्या कृतमुत प्राकृतमिति संशयः। प्रकृतौ पाकात्पूर्वं पेषणं पाकार्थं भवति। न चाल स
तिपेषणे पुरोडाशनिर्वर्त्तकः पाकः कर्त्तुं शक्यते। तेन पाकार्थं पेषणं मंथे तु विनैव पेषणेन सक्तून

चो ३

रूपः पाकस्तंदुलावस्थायामेव कृत इति लुप्तार्थं प्राकृतं पेषणं निवृत्तं न ज्जितेषु तु तंदुलेषु सकृ
न्नावापादनाय लौकिकं पेषणमथ धर्मकं कर्त्तव्यमिति प्राप्ते ब्रूमः। न प्रकृतौ पाकार्थं पेषणं
अपितु [illegible] नयमपि हविरर्थं। अर्थाद्युतयोः सर्वपेषणं। इहत्वर्थादेव पक्वा क्रियत इति क्रमम
त्रमन्यत्। न चैतन्त्यत्वं पदार्थान्यत्वं। तस्मात् प्राकृतमेव पेषणमिति कर्त्तव्याः पेषणधर्माः॥ ३५॥
॥ ॥ इति श्रीशास्त्रदीपिकायां दशमस्य द्वितीयः पादः॥ ॥ विकृतौ शब्दवत्त्वात् प्रधानस्य गुणानाम
धिकोत्पत्तिः सन्निधानात्॥ अग्नीषोमीये पशौ श्रूयते एकादश प्रयाजान्यजतीति। तथा वाजुमीस्येषु न
व प्रयाजान्यजति नवानुयाजानिति। तथा वायव्ये पशौ [illegible] हिरण्यगर्भः समवर्त्तताग्र इत्याघारमा
घारयतीति। एवमन्यत्रापि यत्र प्राकृतमंगम प्राकृतगुणयुक्तं श्रूयते तत्र दुदास्तत्य विचार्यते किंतु तच्चोद
केन प्राकृतीति कर्त्तव्यता प्राप्यते नेति। तदर्थमिदं विचार्यते। किमेते गुणविशिष्टप्रयाजादिविधिरुत प्र
याजाद्यनुवादेन गुणमात्रविधिरिति। तत्रातिदेशो न पदार्थानां न स्वरूपतः पर्युपस्थापनमस्ति प्रकारमा
त्रातिदेशात्। अतो नातिदेशप्राप्यं गीकरणेन गुणविधिः संभवति। तस्मात् संख्याविशिष्टाः प्रयाजाद पा ५
य एवात्र विधीयंते। एवं च धात्वर्थविधानात् तुल्यानुग्रहो भवति। ते च प्रयाजादयः प्रकृतौ कृमापकारा
विकृतौ श्रूयमाणा गृहमेधीयाद्यन्तागव दतिदेशं निरुंधंति। तस्मान्न प्राकृतीति कर्त्तव्यतातिदिश्य एम २८

तदिति प्राप्ते ब्रूमः। प्रकारद्वारतः प्राप्तेरतिदेशेन कर्मणां। तान्यनूद्य गुणाः शक्यो[illegible]धानुमितितद्विधिः। नच
सत्यांगतो न्याय्ये विशिष्टविधिगौरवं। वाक्यार्थविधिदोषश्च समानः पक्षयोर्द्वयोः। योपि ह्यस्मत्यर्थविधि
लिप्सया धात्वर्थविधिस्सति तेनापि गुणवादस्याप्रमादपाठादवश्यं वाक्यार्थविधिरंगीकर्त्तव्यः। तथासति
तत्र संक्रान्ते विधौ धात्वर्थानुवादेनानेकविधिपरिजिहीर्षया प्रकारद्वारमाश्रित्यालोच्य तदनुवादेन विधिर्गुण
मात्रं विधत्ते तस्मादेवंजातीयकेषु गृहमेधीयन्यायात्वाद्यस्यातिदेशः॥१॥ ॥हिरण्यगर्भः पूर्वस्य मंत्रलिंगा
त्॥ वायव्ये पशौ श्रूयते। हिरण्यगर्भः समवर्त्तताग्र इत्याघारमाघारयतीति। तत्साकल्याघारानुवादेन मंत्रवि
धिरिति स्थितं। प्रकृतौ च द्वावाघारौ पूर्वः प्राजापत्यो।ऽमंत्रकश्च उत्तरस्त्वैन्द्रः समंत्रकः। तद्विह किं पूर्वस्याघा
रस्य मंत्रविधिरुतोत्तरस्येति संशये मंत्रस्य प्रजापतिलिंगत्वात्प्रजापतेर्वै हिरण्यगर्भः प्रजापतेरनुरूपत्वा
येति च वाक्यशेषात्पूर्वस्येति प्राप्ते ब्रूमः। पूर्वस्मिन्मंत्राभावान्न मंत्रकार्यमस्ति तत्र मंत्रविधौ मंत्रकार्यम
प्राकृतं कल्प्यं स्यात्। उत्तरे तु प्रकृतावेव मंत्रविधानादस्ति मंत्रनियमजन्यमदृष्टं। तत्र मंत्रविधानं सुकरं।
मंत्रलिंगं त्विंद्रेप्यविशिष्टमिति दर्शितं भाष्ये। वाक्यशेषोपि प्रजानां पतिः प्रजापतिरित्येवमिंद्र एवोपपन्नः।
योपि खलु वाव प्रजापतिः स एवेंद्र इति चैकत्वादुपपत्तिर्वाक्यशेषस्य। पूर्वाघारस्य चाहत्यैवामंत्रत्वं द
श्यते न स्वाहाकारो न मंत्रं चाहेति। तस्मादुत्तरस्य मंत्रः॥२॥ संस्कारेतु क्रियांतरं तस्य विधायकत्वात्॥उत्क

त्र ४

स्पष्टेऽपूर्वघारस्य मंत्रे प्रजापतिलिङ्गे पूर्वाघारस्यालाभात्

पा२

रेवाज्जिनमासादयति परिधौ पशुं नियुंजीते तत्र संशयः। किमप्राकृतमासादनांतरं नियोजनांतरं वाद
ष्टार्थमुत्कर परिधिविशिष्टं विधीयते। उत प्राकृतयोरेवासत्तिर्भावान पक्रमण रूपदृष्टप्रयोजनयोरुत्क
रपरिधिविधिरिति। तत्र तीक्ष्णाग्रत्वात्तुंगत्वाच्चोत्करस्य परिधेश्चाणीयस्त्वान्नदृष्टकार्यमासादनं नियोज
नं न शक्यं कर्तुं। अतो प्राकृतकार्यमन्यद्विधीयते। एवं च धात्वर्थविधानात्कृत्यनुग्रहः। अन्यथा वाक्यार्थ
विधिः स्यादित्येवं प्राप्ते ब्रूमः। नसंभवति गुणमात्रविधौ विशिष्टविधिर्युक्तः। साधारणश्च वाक्यार्थविधि
र्गुणस्यावर्जनीयत्वात्। अतः प्राकृतयोर्गुणविधिः। न चाशक्यता। एवं थ्यग्रतामुत्करस्य पशुस्थविमानं च
परिधेराश्रित्य प्राकृतकार्यसंपादनात्॥५२॥ षड्ढि दीक्षयतीति तासां मंत्रविकारः श्रुतिसंयोगात्॥ अग्नी
प्रकृतितो दीक्षाहुतयः षट् प्राप्ताः तासां च षण्मंत्राः प्रकृतित एव प्राप्ताः आकूत्यै प्रयुजेऽग्नये स्वाहेत्या
दयः। अग्नावपरे षण्मंत्राः आकूतिमग्निं प्रयुजं स्वाहेत्यादयः। ते च दीक्षार्थत्वया विनियुक्ताः षड्ढि दीक्ष
यतीति। दीक्षाहुतीनां चाभ्यासः श्रूयते द्वादशजुहोतीति। तत्र संशयः। किं वैकृतैर्मंत्रैः प्राकृता बाध्यंते स
मुच्चीयंते वेति। तत्र प्रत्यक्षपाठेन प्रत्यक्षवचनेन च वैकृताः प्राकृतान्मंत्रान्बाधेरन्नेककार्यतः। यद्यपि
द्वादशजुहोतीति वचनाद्धोमानामभ्यासस्तथापि वैकृतानामेव प्रत्यक्षवचनविहितानां चोदकप्राप्तमंत्र राम ९५
बाधेन होमांगत्वात्तैरेवाभ्यस्तैर्द्वादशापि होतव्या इति प्राप्ते ब्रूमः। न प्रत्यक्षेणावाकेन होमार्थं वैकृताः श्रु

प्राकृत २

३ तत्रैते अग्न्याहिती चैवाधिकास्तु षडाहुतिषु सा कांक्षा स्तु निवेशनोपपादिष्ट दीक्षा
गतोपपत्तौ न सा हुती चैषि होमाहुतिषु सा हुतमेत्र निरा कांक्षासु निवेशोत्र
साशयः। अतो विनीयते तया ऋताना मे कार्यत्वक् त्वेन याया यो निष्प्रमाण

ताः। दीक्षार्थता बलात्त्रेषां होमांगत्वं प्रकल्प्यते। स हुत्सयोगमात्राद्यतादर्थ्यमुपपद्यते। वैकृतैः प्रा
कृतानां समा। त्त समुच्चेयान बाधनं। षड्भिर्दीक्षयतीति दीक्षार्थताः कृता साचस्वा हाकारलिंगानां
होम द्वारेणेति दीक्षार्थत्व सिद्धये होमांगता कल्प्यते। स कुसमुच्चै रेव च षड्भुहोमे षु दीक्षार्थता सिद्धेति
नाभ्यासेषा कृत बाधे वा प्रमाण मस्ति। तेनाभ्यासवशेन होमानां द्वादशत्वान्मंत्राणामपि प्राकृत वैकृतानां
समुच्चयः। ४। । अग्न्याधेयस्य नैमित्तिके गुणविकारे दक्षिणादानमधिकं स्याद्वाक्य संयोगात्। अस्ति पु
नराधेयं। तच्चाग्न्याधेयधर्मकं। तत्र श्रूयते पुनर्निष्कृतो रथो दक्षिणा पुनरुत्स्यूतं वासः इत्यादि। सेयं दक्षि
णा किं मन्याधेयस्य दक्षिणा नामेकादेयेत्येवमादीनां निवर्त्तिका न वेति चिंतायां सत्यप्येक कार्यत्वे कचनाड्
नयी र्ददातीति समुच्चय प्राप्नोत्युच्यते। विध्यश्रवणाद्धि ध्यंतर शेषत्वाच्चास्य समुच्चय विधावसामर्थ्याद्दक्षि
णायोश्चानत्यर्थत्वे नैककार्यत्वाद्धि कृती। प्राकृती नां बाधः। कथं पुनरुत्नयीर्ददातीति निर्देशः। उच्यते।।
कृत्वाद्यग्न्याधेयं पश्चात्पुनराधेयं क्रियते। तेन पूर्वदत्तसंप्रतिदीयमानापेक्षयोत्नयदान निर्देशः। ५। वासो
वत्संच सामान्यात्। आग्रयणे वासो दक्षिणा वत्सः प्रथमजो दक्षिणेति श्रुते वासो वत्सं समान कार्यत्वात्प्रा
कृतस्यान्वाहार्यस्य निवर्त्तकमिति सिद्धमेवान्तर विवक्षायै प्राप्यते। ६। अर्थापत्तेस्त द्धर्म स्यान्निमित्ताख्या
त्ति संयोगात्।। अन्वाहार्य कार्यापत्ते र्वासो वत्संत द्धर्मी न लक्षतदुत्येत दृषि प्राप्तिस्तत्रमेव। ७। दानेपाकोर्थ

16

द्वितीयपक्षमाहलस्मादितिं संख्या च सा साद्दक्षिणाविशेषणो गवादितु तस्येति षष्ठ्यासंख्या विशेषणमेव स्यात् तथा दक्षिणा
विशेषणमिति व्याख्येयं अतएव मिश्रेः पौर्णमास्याधिकरणे षष्ठ्या क्रियायोगो वाभिधः संबंधे क्रियाप्यनुवादे पिनवाक्य
दक्षिणाया विशिष्टरूपेण विधिरुच्यते

न्वेषणः॥ अन्वाहार्यपाको वत्से कर्त्तव्यो नेति संशये चोदकानुग्रहाय पक्वाव त्सं तदीयं मांसं दाक्षिणत्वेनदेयमि
ति मन्यते। श्रुतं तु वत्सद्रव्यं पाकेन नश्येत अश्रुतं चमांसं दीयेत। चत्ससशब्दो वा मांसलक्षणार्थः स्यात्। नचैतत्
न्याय्यं। तस्मान्न वत्सस्य पाकः॥९॥ पाकस्य चान्नकारितत्वात्॥ अथ वाससि पाकः स्यान्नेति संशये विरोधान्नावा
स्य चेत। प्रयोजनाना वान्नपाकः। प्रकृतौ हि दक्षिणाभूतान्नसंपत्यर्थः पाको नादृष्टार्थः। तस्मान्न वाससः पाकः
॥ ई। तथा त्रिधारणस्य। अत्रिधारणं मन्वाहार्यधर्मः किं वाससो वत्से कर्त्तव्यो नवेति प्रकृतावदृष्टार्थत्वादिहा
विरोधात् कर्त्तव्यं। नैवं। स्वादिमार्थं हि न दृष्टे नैवान्नानामुपकरोति। न चवासो वत्सयोः स्वादिमासयोजनम
स्ति अतो त्रिधारणानिवृत्तिः॥१०॥ ॥ द्रव्यविधिसन्निधौ संख्या तेषां गुणत्वात्स्यात्। ज्योतिष्टोमे श्रूयते। गौश्चा
श्वश्चाश्वतरश्च गर्दभश्चाजाश्चावयश्च व्रीहयश्च यवाश्च तिलाश्च माषाश्च तस्य द्वादशशतं दक्षिणेति। तत्र
संशयः। किमेकैकस्य गवादेर्द्रव्यस्य द्वादशशतसंख्यान्वेतव्या कस्यचिद्यवानां माषाणां। आहोस्वि
त्सर्वैः सहितैः संपाद्या। किं चैकजातीयस्यैवा नियमेनान्यद्वापक्षे नांतेदापि किमनियमोथ गवामिति। तत्र तस्येति
षष्ठ्यांते न गवादीनि प्रधानत्वेनोद्दिश्य तद्गुणभूता संख्या विधीयमाना प्रतिप्रधानं संबध्यते। अतः प्रत्येकं द्वादशश
तमित्येकः पक्षः। नात्र गवाद्युद्देशेन संख्या विधीयते। न त्वेकेन वाक्येन गवादीनां दक्षिणात्वेन चैव संख्याविधानं संभ
वति। तं स्माद्गवादिद्रव्याणि संख्या च दक्षिणायां संबध्यंते। सोयं विशिष्टो विधीयते। तत्रैकस्मिन्द्रव्ये निविष्टायां संख्या

विधानं। तदंगत्वेन २

वा ४

२६

चतुर्थपक्षमाह नेति। चशब्दः पक्षे एवस्यार्थे अर्थान्तरान्वितत्वाभावे। तेन तु दशैकत्वयोः पञ्चान्तसंख्यान्वये गवाद्यन्वयोऽप्यस्या अ
वर्जनीयो माषाणामन्वय धायक इत्यादिरिति भावः। कृतान्वयस्य प्रकरणादेव सिद्धत्वात्तस्यानर्थकत्वापत्तेरपरि लुप्यते यद्विति
णां पादातव्यासु नवति संशयः किं नवानां तृचानामाद्यास्तिस्र उपादेया ० न यस्तृचा गायत्रः प्रथमो बार्हतो
द्वितीयः त्रैष्टुभस्तृतीयः। तत्रैवं वेदवचनं। त्रिछंदा आवापो माध्यंदिनः पवमान ० व्याउ ताद्यस्तृचः सक
लो ग्राह्य इति। तत्र त्रिछंदस्त्वं श्रुत्या प्रकृतौ विहितं चोदकप्राप्तमनुगृहीतं तृचाद्यानामुपादानं। आद्ये
हि तृचे गायत्री मात्रोपसंग्रहात् त्रिछंदस्त्वं हीयते। नन्वाद्यया गायत्र्या द्वितीया गायत्र्युपस्थाप्यते न तु
द्वितीयस्य तृचस्याद्या बृहती। साहि तृतीयया गायत्र्योपस्थाप्यते। तेन पाठक्रमोपस्थापन बलादाद्यस्तृ
त ८

बउपादेयः। सत्यं। पाठमात्रक्रमो लोपनीयः श्रुतिमात्रमत्रिकं छंदस्त्वानुरोधायेति प्राप्ते ब्रूमः। प्रकृतावि
यं श्रुतिरयं पाठ इति बलाबलं चिंत्यं। विकृतौ तु सर्वस्य प्रकृतितो लब्धात्मकस्य प्राप्तस्यानेन कृतः कश्चि
द्बलाबलविशेषः। किं च यद्वि कृतावेव श्रीप्रमुपतिष्ठते तदुपादेयं। अतः क्रम एवात्र बलीयान्। प्रथमाह्नि यंगा
त्री समाप्यमानेव द्वितीयेणा यत्री उपस्थापयति। सोपस्थापितो पक्रांते वनवतीति नान्यस्यास्त्रवस
३० र। तस्मादाद्येत्रचे माध्यंदिनः पवमानः स्तोतव्यः॥२॥ त्रिकात्त्रचे धुर्ये स्यात्॥ एकत्रिकप्रवक्रतो ब्रतिषंगे
नैकस्यां तिसृषु च स्तोत्रेषु संपाद्यमानेषु यानि प्रकृतौ धूर्गानसंपाद्यानि स्तोत्राणि तेषु यत्त्रिकं संपाद्यं
तत्किं तिसृषु स्तुते कस्याएव चाभ्यासेन त्रिकं संपाद्यमिति संशयः। न तत्र वगानपापि चोदकानुग्रहाय गानां
गां १ तरवद्धूर्नान्यपि त्रिकस्तोमकानि त्रचे गातव्यानि। आहृतं धूर्षु स्तुवं इति तु वचनं तिसृष्वपि गीयमानस्य सा
मूः प्रत्येकमावृत्तेस्तोत्राभिप्रायेणानुवादमात्रमिति मन्यते। स्यादेतदेवं यदि सामावृत्तिरियमुच्यते। स्तोत्रावृत्ति
स्त्वियं। गुणकीर्त्तनं च स्तुतिः। अतस्तद्रूपैव स्तुतिरावर्त्तनीया। सा चैकस्यामेव क्रियमाणा तादृश्ये वा तृचा न
वतिनत्वेदं। तत्रान्यथा त्वावस्थावर्जनीयत्वात्। वचनं चैवमनर्थवत्। इतरथा ह्यनुवादमात्रमनर्थकं। तस्माद्धूर्गा
नानि त्रिकस्तोमकान्येकस्यामेव चाभ्यस्तव्यानि॥३॥ चोदनासु त्वपूर्वत्वाल्लिंगेन नियमः स्यात्॥ द्विरात्रादिषु ह एम
मीलेषु द्वादशाहः प्रवर्त्तत इति स्थितं। तत्र किं द्वादशाद्व्यहान्यादितः प्रवर्त्तेत उत प्रायणीयोदयनीयवर्जयित्वा मध्य ३०
मो दशरात्रः। पृष्ठ्यषडहश्छंदोमचतुष्टयात्मक इति संशये विशेषाभावात्सर्वप्रवृत्तावुच्यते। द्विरात्रे यत्प्रथमं तद्वि

आ दिवावयमपि छंदोमच्छेदे इष्यते १

[illegible]

यत् द्वितीयं १ क्रमेति उत्तरमेषाणां तु सर्वोऽक्षः सर्वाणि यजंषि सर्वाणि साम्मानि वा यस्तोमे प्राति लि वंशे सती स्यादि नानर्थक्यं
परिहार्यं सिद्धान्तमाह। क्रमानुग्रहेण च प्रकरण प्राप्त पदार्थ वा चोनपुंक्तः शिष्टाकोप न्यायादिति भावः १

मर

तीयं तं तृतीयं जगती मंतर्गृह्णातीति पार्ष्णिक तृतीयस्य जागतस्यांतरायदर्शनादन्येष्वेवं विधैर्लिंगैर्दशरात्रस्यै
व प्रवृत्तिः। अस्ति च द्वादशाहे मध्यस्य दशरात्रस्य पृथक् संघात कृप्तिः। पृष्ठ्यादारभ्य हि प्रथममहर्द्वितीयमहरि
ति व्यवहारः। चतुर्थं छंदोममहर्दशममहरिति व्यवहारः। सति च दशरात्र संघाते तस्यैव प्रवृत्ति र्लिंगविशेषैर
ध्यवसीयते॥४॥ अप्पर्वा सु तु संख्यासु विकल्पः स्यात् सर्वासामर्थ्यबलात्॥ बहूनामेकदेश ग्रहणे सत्या घोपा
दानमंत्यलोप इति स्थितं। यत्र तु प्रकरण पठितानां मंत्राणामेकदेश ग्रहणं यथाऽग्नावाधून नार्थानां वैशीनां
त्वा पत्मन्नाधुनेमीत्येवमादीनां च पनार्थानां च यातानाम् ओषधयइत्येवमादीनां सप्तदशिरो धुनोति चतुर्दशभि
र्वपतीति तत्रापि किमाद्योपादानमुतानियम इति संशये क्रमानुग्रहाया द्योपादाने प्राप्ते ब्रूलीयसा प्रकरणेन स
र्वेषामंगत्वावगमात् संख्या श्रुते श्चानियमेन तत्संख्योपादाने प्यविरोधात् क्रमवाधेनादितो मध्यतोंततो वा सप्तानां च
तुर्दशानां चोपादानं॥५॥ स्तोमविवृद्धो प्राकृतानामभ्यासेन संख्यापूरणमविकारात्संख्यायागुणशब्दत्वा
दन्यस्य चाश्रुतित्वात्। विवृद्धस्तोमके पुक्रतु षे क्रविंशेनातिरात्रेण प्रजाकामं याजयेदित्यादिषु किं प्राक
तानामेव साम्नामभ्यासेन स्तोम विवृद्धिसंपादनमुताप्राकृतानां साम्नामागमेनेति संदेहेऽन्येषामश्रवणा
त्संख्यायाश्च प्राकृताभ्यासेनापि संपत्तेरभ्यास एव न्याय्यः। नैवं। संख्या हि पृथक्त्व निवेशिनी स्तोत्रीयागता
सं पाद्या स्तोत्रीया पृथक्त्व सिध्यर्थं सामांतरागममाक्षिपति। अभ्यासे हि मुख्य पृथक्त्वाभावादसमंजसा
संख्या स्यात् तस्मादागमः। स च साम्नामेव न चर्चां त्रीतिहवेयद्वस्यादरा लिगायत्री रहत्यनुष्टुप्त्रत्र ले

वावपंत्यत एवो द्व्यंतीतिवचनेनावृ॑ त्त्यानां गायत्र्याद्याधारत्वनियमाद् वां चक्ष्वीभापासं न्नवादने नैव
वचनेन न्यायमाप्तोप्यागमः पवमानविषय एव कृत इति स्तोत्रांतरेष्वागत्यासे नैव संख्यापूरणमित्यु
क्तं ॥ ६ ॥ बहिष्पवमाने त्वागागमः सामैकत्वात् ॥ बहिष्पवमाने किं सामागम उत गागम इति संशये पूर्वेण न्या
येन सामागमे प्राप्ते ब्रूमः । एकं द्वित्रं सामेति ब्रूयात्स्वरसामैव गायतीति वचनात्सामागमो न संभवति ।
न चाभ्यासेनापि संख्यापूरणं भवति । पराग्बहिष्पवमाने न स्तुवीतेत्यनभ्यासवचने न पराकृशब्देना
भ्यासस्य पक्षस्यैव निषिद्धत्वात् । तस्माद्गागमः ॥ ७ ॥ अभ्यासेन संख्यापूरणं सामिधेनीष्वभ्यासप्रकृतित्वा
त् ॥ यत्र सामिधेनी विवृद्धिरेकविंशतिमनुब्रूयात्प्रतिष्ठाकामस्येत्यादौ तत्र किं प्राकृतीभ्य एकादशभ्योऽधि
कानामागम उत प्रथमोत्तमयोरेवाभ्यासेन संख्यापूरणमुत यावदुक्तं त्रिरभ्यासं प्रथमोत्तमयोः कृत्वा
वशिष्टानामागम इति संशये संख्यासामंजस्यादेकादशभ्यः प्राकृतीभ्योतिरिक्तानां सर्वासामागमः । नै
वं । प्रकृतौ हि पंचदशसु सामिधेनीषु विहितास्वेकादशसु पठितासु वचनं त्रिः प्रथमामन्वाहेति त्रिरुत्तमामि
ति संख्यापूरणं यावद्भवति तावत्प्रथमोत्तमयोरभ्यसितव्यमित्येवंपरं । पूरणसंख्यानिप्रायश्च त्रिःशब्दो
हि दृष्टार्थत्वात्त्रित्वस्वरूपपरत्वे ह्यदृष्टार्थता स्यात् । तस्मात्प्रथमोत्तमयोरभ्यासेन संख्यापूरणमिति प्रा राम
प्ते ब्रूमः । स्यादेवं यदि पूरणसंख्यायास्त्रित्वस्य च संप्रतिपत्तिः स्यान्न त्वेतदस्ति । न ह्येवं प्रथमोत्तमयो ३१
रभ्यासेन संख्यायां पूर्यमाणायामेकैकस्यास्त्रिरभ्यासोऽनुवर्तते । चतुरभ्यासेनापि तत्पूरणासंभवात् । तस्मा

किंच। प्रकरणप्राप्तप्रकृत्यर्थत्वात् येनोक्थ्यादिवाक्यानामुक्थ्यादिविकृतिष्वपि नियोजकत्वे अप्राप्तविधित्वाद्गौरवं स्यात्
प्रकृत्यर्थत्वे सति देशप्राप्तएवांगत्वे नियमसमात्रबोधनाल्लाघवमिति स्यात्तत्रेति। १३

त्रिरभ्यास एवात्र विवक्षितो नयावत्पूरणमभ्यासः। तेन विकृतिष्वपि त्रिरभ्यासः। तस्मात्प्रथमोत्तमे त्रिरभ्यस्या
वशिष्टानामाग्नेयी[stain]नां दाशतयीभ्य आगमः। किं पुनरागम्यमानानां कर्मसंबंधे प्रमाणं। न तावल्लिंगं। तस्या
ग्न्यादिस्वरूपमात्रविषयत्वेन क्रत्वर्थत्वे प्रमाणत्वासंभवात्। सर्वत्र हि लिंगं यत्किंचित्प्रमाणकं क्रतुसंबंधसा
मान्यमपेक्ष्य प्रहारविशेषमात्रे प्रमाणमिति याज्यापुरोनुवाक्याकांडे व्याख्यातं। न चान्यदिह प्रमाणं परस्परं। उच्य
ते। संख्यैवात्र संख्येयानां कर्मांगत्वे प्रमाणं। तथा हि सामिधेनीपरिच्छेदद्वारे[stain] क्रतोरुपकर्त्तव्यं। अग्निसमिंधन
प्रकाशिकाश्चर्चः सामिधेन्य उच्यंते। तेन तत्समर्थायाः काश्चिदृचोवश्यमुपादातव्याः। एवं सर्वत्रागमेद्रष्टव्यं॥८॥
षोडशिनो वैकृतत्वं तत्र कृत्स्नविधानात्॥ अस्ति ज्योतिष्टोमे षोडशी। स च षोडशिना वीर्यकाम इति पुरुषार्थत
याभ्यूयते। अप्यग्निष्टोमे राजन्यस्य गृह्णीयादप्युक्थ्ये ग्राह्योतिरात्रे ब्राह्मणस्योत्तरे हनि द्विरात्रस्य गृह्यते म
ध्यमेहंस्त्रिरात्रस्य चतुर्थेहन्यहीनस्य गृह्यत इति। तत्र क्रत्वर्थं षोडशिनं प्रति संदेहः। किं प्रकृतौ स्यादुत वि
कृतिष्वेवोत्कृष्टव्य इति। उत्तरे हन्द्विरात्रस्य गृह्यत इत्यादिवचनैर्विकृतिसंबंधावगमादग्निष्टोमे राजन्यस्ये
त्यादिवचनस्य च वैकृताग्निष्टोमादिविषयत्वेनाप्यविरोधात्प्रकरणं बाधित्वा वाक्येनोत्कर्षे प्राप्ते ब्रूमः। प्र
कृतिप्रकरणाम्नातेरग्निष्टोमादिशब्दैस्तत्रैव संभवद्भिः किमित्यसंनिहितापि विकृतिरभिधीयते। तस्मा
द्वाक्येनैव प्रकृतौ स्यात्॥ तत्र राजन्यादिनिमित्तेन विहितः स विकृतिष्वनैमित्तिको विधीयत उत्तरे हन्द्विरात्रस्ये

विहितापि [stain] पुनः क्रत्वर्थतया ६

सवनेसवनेगृह्णातीतिशाखांतरवाक्यमनन्यशेषत्वेन नास्तीतिकृत्वाचिंतेषा। कृत्याचिंतहेतुंपरमतेनप्रश्नाप्रयोसाहा किं
पूर्वसवनयोरुक्थ्याभावंतस्यचकृत्वाचिंतारंतुतमभ्युपेत्यपूर्वपक्षसमेसमाप्यारभ्यते। वीर मिति
तुल्यायोगोक्त्यापरमतंदूषयतितदितिपूर्वसवनयोरुक्थ्याभावमभ्युपेत्यैवतस्यकृत्वाचिंतारुतुलं नास्तीत्याह किंचेतिद्
ति। १॥ तस्याग्रयणाद्ग्रहणं॥ षोडशिन्येव संशयः। किमसावाग्रयणादुक्थ्याद्वा ग्रहीतव्य उताग्रयणादेवे
ति। तत्राग्रयणाद्गृह्णातिउक्थ्यान्निर्गृह्णातीति वचनद्वयाद्विकल्पेन समुच्चयेनवोभयाग्रहणेते। एवमुपर्य
वसिते पूर्वपक्षे चिंता॥ तृतीयसवनेस्यात्॥ किं षोडशी सवनत्रये ग्राह्य उत तृतीयसवनएवेति। किं पुनःका
रणमंतराचिंतायाः। मूलाधिकरणसिद्धांतेकालोपलक्षणत्वमुक्थ्यस्यस्थास्यति। स्थितेचतस्मिन्पूर्वयोःसव
नयोर्ग्रहणमाशंकितुमशक्यंतयोरुक्थ्याभावात्। तस्मान्नाद्येचिंतितमितिकेचित्। तदयुक्तं। एवमपि पूर्व
पक्षेसमाप्यकर्तव्येयंचिंतास्यान्नमध्ये। किंच प्रातःसवनेगृहीतव्यइत्यादिवचनादस्यसवनत्रयेग्रहण
माशंक्यते। नच वचनस्यपरिपंथिसंभवति। तस्माद्यद्यपिपूर्वयोःसवनयोरुक्थ्याभावात्तदुत्तरकालता २७
त नसंभवतिथापिवचनबलाद्गृहीतव्यः कालवचनंतुतार्तीयसवनग्रहणाभिप्रायेणविष्यति। विद्यतेच
पूर्वयोरपिसवनयोरुक्थ्यं। तस्माद्विचित्रगतिःसूत्रकारस्त्रिंतांतरमध्येपिप्रसंगात्त्विंतांतरं कृतवानित्येवंवक्त
व्यं। तत्रप्रातःसवनेगृह्णातीत्यादिभिर्वाक्यैःसवनत्रयेपिविधानात्त्रिष्वपिग्राह्यः। नैवं। प्रातःसवनाद्यनुक्र
मणेनिंदाश्रवणात्तृतीयसवनस्तुत्यर्थंसवनत्रयंह्यनुक्रम्यतस्मात्तःसवनेगृह्णीयादिन्द्रोवैषोडशीत्यादि
नासवनत्रयंनिंदित्वात्तृतीयसवनेग्राह्यइतिश्रूयते। तस्मात्सर्वमिदमेकंवाक्यंतृतीयसवनेषोडशिवि राम
धानार्थमितितत्रैवास्यग्रहणं। स्थितादुत्तरं। उक्थ्याद्गृह्णातिषोडशिनमितिवचनादुक्थ्यादपिगृहीतव्य ३२

६२

एवंपूर्वसवनयोरुक्थ्याभावाभ्युपगमेनपूर्वपक्षेपिकृत्वाचिंतारिंताशंकयातीतेकाइदानींपूर्वसवनयोरप्युक्थ्यसत्त्वात्तामाहविद्यतेचेतिस्वमते
कृत्वाचिंतोपपत्तिमाह तस्मादितिद्

मित्युक्तं। यदपि शाखान्तरवचनं पराञ्चमुक्थ्यात् षोडशिनं गृह्णातीति तत्राप्युक्थ्यादित्यपादाने पञ्चमी न
दिक्शब्दयोगनिमित्ता। पराक्शब्दस्य पराचीः सामिधेनीरिति वदनभ्यासवाचित्वेन दिक्शब्दत्वाभावात्।
तस्मादुक्तोऽभ्यासग्रहणमिति पाठेऽक्रमः। कृत्स्नस्याश्रयणादेव ग्रहणानित्यत्वमुक्तं। न युक्तं बाधितुं तस्मान्न वि
कल्पसमुच्चयौ। यत्तु वचनादिति तन्न। पराञ्चमुक्थ्यादित्यत्र पराक्शब्दोऽनभ्यासवचनः सन्ननर्थकः स्या
त्। अभ्यासस्य प्राप्त्यभावात्। तस्माद्दिक्शब्दोऽयं कालवचनस्तन्निमित्तैवेयं पञ्चमी उक्थ्यादूर्ध्वकाले षो
डशिनं गृह्णातीति। तत्समानार्थत्वादुक्थ्यान्निगृह्णातीत्यत्रापि दिक्शब्दनिमित्तैव पञ्चमी न ह्येवंविधे दिक्शब्द
योगापेक्षैव सा विनापि तेन मासात्संवत्स्यामीत्यादिषु दर्शनात्। तेनेयं सहयुक्ते स्तीति यावदर्थमात्रापेक्षा न
शब्दप्रयोगमपेक्षते। एवं चाश्रयणात् कृत्स्नस्य नित्यवद्ग्रहणं न बाधितं भवति। तस्मादाश्रयणादेव गृहीत
व्यः॥ १२॥ उक्थ्याग्निष्टोमसंयोगादस्तुतशस्त्रः स्यात्सति हि संस्थान्यत्वं। षोडशिन्येव यदाप्यग्निष्टोमे राज
न्यस्य गृह्णीयादप्युक्थ्ये ग्राह्य इत्यादिवचनादग्निष्टोमोक्थ्ययोर्गृह्यते तदापि सस्तुतशस्त्र इति संशये
। उक्थ्याग्निष्टोमसंयोगेनास्य स्तोत्रादिकं न भवेत्। षोडशिस्तोत्रसंस्थायां नोक्थ्याग्निष्टोमता भवेत्। अ
ग्निष्टोमादिशब्दा हि स्तोत्रसंस्थानिमित्तकाः। षोडशिस्तोत्रसंस्थायां नाग्निष्टोमता भवेत्। अग्निष्टोमे एतत्रा
[illegible] ग्राह्य इत्येतदेव विरुध्यते। तस्मादस्तुतशस्त्रः स्यात्। सत्यं संस्थान्य

७२

४ किमस्तुतशस्त्रः स्यादुतनदा

थापत्तिर्वचनान्न दुष्यति। एवं संस्थोपमर्द्देन संस्थैवान्या विधीयते। उक्थ्यसंस्थो हि यः प्राप्तस्तथाग्नि
ष्टोमसंस्थितिः। राजन्यस्य तथा नासौ किंतु षोडशिसंस्थितिः। इत्येष वचनस्यार्थस्तस्मात्सस्तुतशस्त्रकः।
तदंगत्वेन हि स्तोत्रं शस्त्रं चाहत्य चोदितं। एकविंशं स्तोत्रं भवति प्रतिष्ठित्यै हरिवत्स्यत इति विहितं स्तुत
शस्त्रमसति विरोधे किमु वक्तव्याग्निष्टोमसंस्थे स्यान्न क्रियते। तस्मात्सस्तुतशस्त्रः ॥१३॥ अत्रा वादति
रात्रे षुगृह्यते॥ अंगिरसां द्विरात्रेऽभूयते वैखानसं ह्वेह न्साम भवति षोडश्युत्तर इति। किमिदमप्राप्त
स्य षोडशिनो विधानार्थमुत प्राप्तस्य परिसंख्यार्थमिति संशये विधिः प्राप्त्यभावात्। न तावच्चोदके
न प्राप्तिः स ह्यानुमानिकः। तत्प्राप्तेः प्रागेव प्रत्यक्षेणावचनेन विधीयते उत्तरे हन्द्वि रात्रस्य गृह्यत इत्य
नेन। अथवा वैकल्पिकी चोदकप्राप्तिः प्रकृतावतिरात्रे षोडशिनो वैकल्पिकत्वात्। तत्र नियमार्थं विधानं। वि
हितं च तस्मिन्नानुमानिको न प्रापयति। तस्मान्न तावच्चोदकप्राप्तिमपेक्ष्य तत्परिसंख्या। न वानेनोत्तरे हन्द्वि
रात्रस्य गृह्यत इति सामान्यवचनेन प्राप्तत्वात् षोडश्युत्तरवचनं परिसंख्यार्थमिति वाच्यं। सामान्येन हि सर्वाह्नि
रात्राणामिदं वचनं। तत्प्राप्तेः प्रागेवांगिरसां द्विरात्रे षोडश्युत्तर इति विशेषवचनेन विधीयते। तस्मादप्राप्तवि
धिः षोडश्युत्तर इति। नैतदेवं। यद्यपीदं सामान्यवचनं तथापि प्रत्यक्षेणैव वचनेन हि रात्रेषूत्तरेषामह्नां वि
कल्पेन प्राप्तः षोडशी नियतः। षोडश्युत्तर इत्यत्र तु नास्ति प्रत्यक्षो द्विरात्रादिसंयोगः। प्रकरणात्तु कल्प्येत तत्

मै ५

राम ३३

मि १

चोदकात्तर

त्वाद्दुर्बलत्वाद्वाक्यात्। तस्मात्सामान्यवचनेनैव वैकल्पिकीं षोडशिप्राप्तिमपोद्य नियम्यमानः षोडशी षोडश्यु-
त्तर इत्यनेन द्विरात्रांतरेभ्यः परिसंख्यायते। तेनांगिरसद्विरात्र एव नियमः। द्विरात्रांतरेषु तु यथा षोडशिवि-
कल्प एव स्यात्। तदिदं रथंतरकारव्याख्यानमधिकरणस्यानुपपन्नमिति मत्वा भाष्यकारेण व्याख्यानांत-
रमारब्धं। तत्र यः पूर्वस्मिन्व्याख्याने सिद्धांतः स एव एवं पक्षः परिसंख्येति। सिद्धांतस्तु परिसंख्यायास्त्रि-
दोषत्वाद्धेरवानसविधिशेषोयं नविधिः परिसंख्या वा। तस्मात्सर्वद्विरात्रेषूत्तरेषामङ्गानियत एव षोडशी
सामान्यवचनेन प्राप्तत्वाद्वचनांतरेण परिसंख्यातत्वात्॥१४॥ चतुर्थे चतुर्थेहन्यहीनस्य गृह्यत इत्यभ्या-
सेन प्रतीयेतनोऽजनवत्। षोडश्येव चतुर्थे चतुर्थेहन्यहीनस्य गृह्यत इति श्रूयमाणः संदिह्यते किमेकस्यै-
वाहीनस्य चतुर्थे गृहीत्वा पुनस्तत्पुरस्ताच्चतुर्थेभ्यासेन गृहीतव्य उतैकस्याहीनस्यैकस्मिन्नेव चतुर्थे स-
कृद्ग्रहणं। वीप्सा तु नानाहीनाभिप्रायेति। तत्र नानाहीनाभिप्रायत्वे न्यायप्राप्तत्वेन वीप्सानर्थक्यादही-
नस्येति चैकश्रवणादेकस्मिन्नहीने चतुर्थे चतुर्थेभ्यासः। नैवं। अहीनस्य चतुर्थ इत्युच्यते। एकस्य चाही-
नस्यैकमेव चतुर्थमहः। यत्तु चतुर्थाच्चतुर्थं तदहीनस्याष्टमं भवति। तत्र गृह्णन्नाहीनस्य चतुर्थे गृह्णी-
यात्तस्मात्सकृद्ग्रहणं। एकवचनं तु सामान्याभिप्रायं। वीप्सा च न्यायप्राप्तानुवादः॥१५॥ जगत्साम्नि सामा-
नाधाकृतः सामतदाख्यं स्यात्॥ ज्योतिष्टोमे श्रूयते। यदि रथंतरसामा सोमः स्यादैन्द्रवायवाग्रान्ग्रहा-

नरहल्यायदि बृहत्सामास्तु क आग्रान्यदि जगत्सामा आग्रयणाग्रानिति। किमाग्रयणाग्रताऽन्यो
तिष्टोमे निविशते किं वोत्कृष्यतेति संशये प्रकरणाज्ज्योतिष्टोमे स्यात्। जगत्साम शब्देनापि
ज्योतिष्टोम एव प्रकरणाद्यथा कथं चिदुच्यत इति प्राप्ते ब्रूमः। न जगन्नाम साम ज्योतिष्टोमेऽन्यत्र वा
कुत्र चिदस्ति तेनायमृग्द्वारेणाव्यपदेशः। जगत्यामच्युत्थेन्नं साम जगत्साम मतं त्रैस जगत्साम। घ ४
न च ज्योतिष्टोमे तदस्ति विद्यते तु विषुवति। तस्माद्विषुवान् जगत्सामा। न तस्य तु क आग्रयणाग्रताप्रकर
णादुत्कृष्टव्या ॥१६॥ एवं वा। यदि जगत्सामा आग्रयणाग्रानित्यत्रैव जगत्साम शब्दे संदेहः। किमनेन ज्योति
ष्टोम एव रथंतरसामा बृहत्सामा वोच्यते किं वा स एवोऽन्यसामा अथवा रथंतरसामैव उत पुनर्जगत्यामुत्प
न्नं साम विषुवति स्तोमेनाम्नायत इति। प्रकरणाज्ज्योतिष्टोम एवान्यतरसाम्नाभिधीयते। तथा सति पूर्वाभ्या
मग्रताभ्यामाग्रयणाग्रताया विकल्प एव स्यात्तस्मादुभयसामा जगत्सामा जगच्छब्दो हि कृत्स्नवचनः का
र्त्स्न्येन च समुच्चयः स्यात्। तस्मात्समुच्चितोभयसामा जगत्सामा। नैवमपि युक्तं। एवं हि सति जगत्सामेत्य
नर्थकं स्यादाग्रयणाग्रान्नरहल्यादित्येतावतैवोभयसामपक्षे निवेशसिद्धेः अन्यतरसामत्वपक्षयोः ग्म
पूर्वाभ्यामग्रताभ्यामवरुद्धत्वात्। न चोभयसामत्वं ज्योतिष्टोमेऽस्ति। बृहद्रथंतरयोर्वचने नैव विकल्पविधा ३४

यथा कृथं चितः [illegible] दोषदूषितः ४ दूषयति ५

नात्। तस्मादीशानमस्य जगतः स्वर्दृशमित्येवं जगच्छब्दवत्यामुत्पन्नं रथंतरमेव जगत्साम। अतस्तत्सा
मा जगत्सामेति प्राप्ते ब्रूमः॥ पदद्वारेण ऋग्गता चाव साम लक्ष्यते न त्वं स्या न तत्र लक्षितलक्षणा स्यात्। तस्मा
ज्जगत्यामुत्पन्नेन साम्ना विषुवानेव जगत्साम। तदर्थं चाग्रयणाग्रत्वं। एवं व्याख्यायां नैमित्तिकमाग्रयणाग्रत्वं
विचारितं तं देहेतुत्वेन तु जगत्सामशब्दप्रस्तावः इह तु सरव साक्षाद्विचारितइति भेदः॥१७॥ उभयसाम्नि नैमित्ती
कं विकल्पेन समत्वात्स्यात्॥ यत्र बृहद्रथंतरपृष्ठयोः समुच्चयः संसवगोसवादिषु तत्र यस्य बृहतो रथंतरनिमि नंद्व
तन्निमित्तं [illegible] च पर्छ वतीरथंतरपृष्ठस्य प्रतिपदं कुर्यादग्र्यवतीर्बृहत्पृष्ठस्येत्यादि तदुभयं विकल्पेन कर्तव्यमुत रथं
२ तं निमित्तमेवाथवोभयं न कर्तव्यमिति संशयः। तत्रोभयसामत्व पि रथंतरस्य बृहतश्च सद्भावात्तत्तया चोभयोः
क्रतुविशेषणत्वादुभयमपि प्राप्तं समुच्चयासंभवाद्विशेषाग्रहणाच्च विकल्पः। अथवा मुख्यत्वाद्रथंतरनिमित्तमे
व स्यादिति प्राप्ते ब्रूमः। बृहद्रथंतरे हि प्रकृतौ निरपेक्षया सत्तया परस्परव्यवच्छेदेन वा क्रतुं विशिंष्ट इति निमित्तता
मुपगते। अत्र तूभयोः सद्भावे क्रतुसंबंधात्सापेक्षयोर्नान्यतरेणापि क्रतुर्विशेष्यते। तस्मान्निमित्तविघातादकर्तव्यं॥
॥१८॥ ऐंद्रवायवस्याग्रव[illegible]चनादादितः प्रतिकर्षः स्यात्॥ ज्योतिष्टोमे उपांश्वंतर्यामाव धाराग्रहो विधायैंद्रवा
यवमैत्रावरुणादीनां धाराग्रहाणामुपक्रमे श्रूयते वाग्वा एषा यदैंद्रवायवो यदैंद्रवायवाग्रा ग्रहा गृह्यंते वाचमे
वानुप्रयंतीत्यत्र एते धारया गृह्णातीति। तत्र संशयः। किमैंद्रवायवः सर्वादित उपांश्वंतर्यामाभ्यामपि पूर्वं गृहीन

अग्रत्वं च २

वायव्यसंनिधेरैंद्रवायवाग्रताविधौग्र ... प्राति ... धाराग्रहपर एव ते षां च पाठादेव सिद्धं ... द्रवायवाग्रतेति ... विधिरेवायमिस्य ... यत्तु तदा ... विशेषवि ... स्यमानत्वादु ... कामस्य ... धाराग्रहाणामेवाम्नाय

च्युतपाठप्राप्तस्थान इति। तदर्थमिदं विचार्यते किमैंद्रवायवप्रभृतीनां ग्रहाणामेतद्विधायक
मुत ग्रहानुवादेनैंद्रवायवाग्रताधर्मो गत्वेन विधीयत इति तत्र ग्रहाणां वचनांतरेरेव प्राप्तत्वात्तद
ग्रताविधिरयं। तेंच्चाविशेषेण सर्वग्रहाणामंगमुपांश्वंतर्यामयो रपि संपादयितव्यं। इतरथा तयोर्वै
गुण्यं स्यात्। अतः सर्वादितः प्रतिकर्षः। स्यादेवं यद्यग्रताविधिः स्यात्तद्ग्रहविधिस्त्वयं। कथं धारासं
योगाद्धि धाराग्रहाणामत्र ग्रहणमिति नोपादानं। ते षां च पाठप्राप्तमैंद्रवायवाग्रत्वं। अतो वक्ष्यमा
णानामैंद्रवायवापवादीनां ग्रहाणां संक्षेपेणापमुपक्रमः। तस्मात्स्वस्थानस्यैवैंद्रवायवस्य ग्रहणं॥१९॥
कामसंयोगेनुवचनाददादितः प्रतिकर्षः स्यात्। तत्रैव संक्षेपेणोपक्रम्य प्राग्विस्तारवचने ष्पः कामसंयु
क्तानि वचनान्याम्नातानि। ऐंद्रवायवाग्रान्गृह्णीयाद्यः कामयेत यथा पूर्वं प्रजाः कल्पेरन्निति। त
त्र किं सर्वादितः प्रतिकर्ष उत तत्रापि स्वस्थान एव ग्रहणमिति। तत्र ग्रहाणां नित्यत्वान्न कामे विधानं
अतोत्रैवैंद्रवायवाग्रतागुणः कामाय विधीयत इति सर्वादितः प्रतिकर्षः। नैवं। गुणो हि विधीयमानः प्र
कृतान्ग्रहानाश्रित्य विधीयेत। धाराग्रहाश्च प्रकृ ... नतः कामसंयोगेपि स्वस्थान ऐंद्रवा
यवाग्रतापि पाठादेव प्राप्तासतीकामे विधातव्या। तेंद्र रंम्क त्वर्थविधानाय ग्रहणमेव कामे विहितमतः
कामसंयोगेपि स्वस्थान ऐंद्रवायवः॥२०॥ परेषु चाग्रशः सर्वं स्यात्तदादिषु॥ तत्रैव वक्ष्यते शुक्राग्रान्
... ताः। ते षां च स्वरूप वदैंद्रवा ...

... प्रयोगेपि ... क्रोद्धृता। कर्मांतरत्वेन ... दोष आपद्येत २

गृह्णीयात्प्रतिष्ठाकामो मंथ्यग्रानभिचरन्नित्यादि। तत्र संशयः। किं शुक्राग्रादीनामपि कामसंयोगे स्वस्था
नेग्रहणमुत प्रतिकर्ष इति। तत्र पूर्ववदेव शुक्रप्रभृतीनां ग्रहाणां कामे विधानात्स्वस्थाने प्राप्त उच्यते॥
नहि प्रकृतधारा ग्रहाः पाठतः शुक्राग्राग्रेन तदनुवादेन ग्रहाणां कामे विधिः स्यादैन्द्रवायवाग्रान्गृह्णीते।
तत्र ग्रहान्कामे ग्रहेषु च शुक्राग्रतां विदधद्वाक्यं भिद्यते। तस्माद्ग्रहणाश्रितः शुक्राग्रादिगुणः कामाय ता४
विधीयत इति प्रतिकर्षः॥२१॥ पुरस्तादैन्द्रवायवाग्रस्य कृतदेशत्वात्॥ स्थिते प्रतिकर्षे चिंत्यते किं सर्वा
दितः प्रतिकर्ष उतैन्द्रवायवात्पूर्वमिति। विशेषाग्रहणात्सर्वग्रहाणां पुरस्ताच्छुक्रोपक्रमः स्यादिति प्रा
प्ते ब्रूमः। कामाय हि गुणो विधीयमानः प्रकृतान्ग्रहानाश्रित्य विधीयते। प्रकृतास्त्र यदैन्द्रवायवाग्रा
गृह्णीत इत्यनेन साधारणेनोपक्रमेणोपक्रान्ता ऐन्द्रवायवाद्या धारा ग्रहा वक्ष्यमाणास्तेन तानेवाश्रि
त्य शुक्राग्रतागुणः कामाय विधीयत इति न सर्वादितः प्रकर्षः इदमेव च वक्ष्यमाणानां ग्रहाणां साधार ति६
णोपक्रमस्य प्रयोजनं कथं नाम सर्व एव वक्ष्यमाणा ग्रहाः काम्यानां गुणानामाश्रयत्वं प्रतिपद्येरन्नि
ति॥२२॥ सादनं चाविशेषत्वात्॥ धाराग्रहाणां पूर्वं पूर्वं गृहीत्वा सादयित्वोत्तरोत्तरस्य ग्रहणं सर्वेषु
गृहीतेषु सादितेषु च पश्चात्क्रमेण प्रदानमित्येषा तावन्नित्या प्रकृतिः। कामाय तु शुक्रादि ग्रहणोत्कर्षे प्रकृ
ष्यमाणेषु किं सादनस्य संपादनं। न ह्यनासाद्य क्रमपरो ग्रहीतुं शक्यते। तस्माद्ग्रहणाविशेषत्वात्सादन
स्यैतस्य प्रतिकर्षः प्रतिकर्षः॥२३॥ प्रदानं चापि सादनवत्॥ तथा प्रदानं किं प्रतिकृष्यते नेति संशये प्रदाना
२४ सादनं प्रतिकृष्यते नेति सं... प्रतिकर्ष इति प्राप्त उच्यते। सादन
स्यैव तत्प्रयोजनं यदुत्तरग्रहणं ४२

अतः प्रदानानुपक्रमरूपतायैवावगतं शुक्रग्रहणं कामायापकृष्यत इति शुक्रग्रहणस्यापकर्षः । शुक्रामंथिभ्यां प्रचरत
इति नियमें मंथिसमकालमेवानुष्ठेय इत्याहावगतेति २
दा२

पक्रमत्वाद् ग्रहणस्य तस्य निकर्षे प्रदानस्य प्रतिकर्षः । नैवं । न ह्येवं प्रदानवत् प्रदानोपक्रमो ग्रहणं । सर्वे ग्रहा हीनेष्वप
स्यात्सर्वदा नं नित्यत्वं कृत्ताविति शुक्रं । अवगतस्वरूपं च ग्रहणं कामे विप्रतिकृष्यत इति न प्रतिकृष्यमाणस्यापि
प्रदानोपक्रमत्वं । तस्मान्न प्रदानापकर्षः ॥ २४ ॥ आनीकायान्यायोक्ते साम्नानं गुणार्थं स्यात् ॥ द्वादशाहे त्र्य
36 नीकाम्नाना । ऐंद्रवायवाग्रो प्रायणीयोदयनीयो दशमं चाहः रथंतरे षां नवं नाम ह्लाऐंद्रवायवाग्रप्रथम
महः रथ शुक्राग्रमथाग्रयणाग्रमथैंद्रवायवाग्रमथ शुक्राग्रमित्यादि । तत्र प्रथमद्वितीययोरह्नोरैंद्रवा
यवाग्रता शुक्राग्रता च स्कृता सा तयोः रथंतरसामत्वा बृहत्सामत्वाच्च प्रकृति तरेव प्राप्ता सती किमर्थं श्रूयत
इति चिंत्यते । अनुवादमात्रमित्येकः पक्षः । तथा सत्यानर्थक्यं स्यात्तस्मादंगांतरपरिसंख्यार्थं । तापि त्रिदो
पे७ षा । तस्मादर्थवादार्था । स्तीहन्याग्रयणाग्रतान्याय्या पूर्वयोरैंद्रवायवाग्रतायाः शुक्राकृतायाश्चानुष्ठि
तत्वाद् ज्ञामित्वायेति । सिद्धांतस्तु प्रकृतौ रथंतरसामत्वेन बृहत्सामत्वेन च निमित्तेन नैमित्तिके ऐंद्रवाय
वाग्रशुक्राग्रते विहिते तथैव चोदकेन प्राप्येते । इदं त्वनैमित्तिकार्थं वचनं । तस्य च प्रयोजनं तत्र द्विकृति नि५
यता४ ष्वसत्यपि रथंतरबृहत्सामत्वे ऐंद्रवायवशुक्राग्रतयोः सिद्धिः ॥ २५ ॥ द्वादशाहस्य व्यूढसमूढत्वं प्र
ष्ठवत् समानविधानं स्यात् ॥ ग्रहाग्रताविशेषद्वैविध्याद् द्विविधो द्वादशाहः समूढो व्यूढश्च । समू
ढः पूर्वोक्तः । व्यूढस्त्वैंद्रवायवाग्रो प्रायणीयोदयनीयो अथेतरे षां दशानां नाम ह्लामैंद्रवायवाग्रं राम
प्रथमम हः रथ शुक्राग्रमथ द्वे आग्रयणाग्रे अथैंद्रवायवाग्रमथ द्वे शुक्राग्रे अथाग्रयणाग्रम ३६

मथर्ह्येंद्रवायवाग्र इति। तत्र किं द्व्यपिरूपे द्वादशाहस्य नैसर्गिके वैकल्पिके कृत्वंगेऽउत समस्तमेवनि
त्यं व्यूढरूपं तु तस्यैव काम्यो विकार इति। तत्र व्यूढस्याप्यकामसंयुक्तस्योत्पन्नस्य वाक्यांतरेण काम
संयोगे सत्यप्येकस्य तूभयत्वे संयोगपृथक्त्वमित्यनेन न्यायेन कृत्वर्थता पुरुषार्थता च। तस्मात्समस्त
व्यूढोपि कृत्वर्थः। उच्यते। न दध्यादिवद्व्यूढस्याप्ययार्थं संयुक्तं। तत्र हि दध्यादीन्द्रियसंबंधं विदधद्वाक्य
लोकतो दधिस्वरूपं प्रकरणेन वाक्यसंबंधं लब्ध्वा नदध्यानुहोतीत्येतं दधिविधिमपेक्षते। व्यूढस्व
रूपस्य तु लोकतोऽप्रसिद्धेरवश्यं वाक्यांतरसिद्धैव व्यूढोत्पत्तिः कामवाक्येन फले विधातव्या। अतः
प्रत्यक्षेण कामवाक्येन फलत्वागतान्न व्यूढोत्पत्तिवाक्यं प्रकरणेन कृत्वंगतां नेतुं नेते। तस्मात्समस्त
विकारो व्यूढः॥२६॥ एकादशिनीवच्छेनीकापरिवृत्तिः स्यात्। गवामयने एकषष्ट्यधिकानि त्रीणि
शतान्यहानि। अशीतिशतं पूर्वं पक्षः तथोत्तरं। मध्ये विषुवान्। तथाहः कृशिंतांडकिनः समामनंति। प्रायणीयं
प्रथममहश्चतुर्विंशं द्वितीयं। ततश्चत्वारोभिप्लवाः षडहाः। एकः पृष्ठ्यः षडहः। समासः स द्वितीयः सहतृती
यः स चतुर्थः पंचमः। तत्र त्रयोभिप्लवाः षडहाः। एकः पृ[illegible] षडहः। अभिजिन्नामैकाहः। त्रयः स्वरसामानः
इत्यष्टाविंशतिरहानि। आद्याभ्यां महोभ्यां सह षण्मासाः। नदिदं पूर्वपक्षः। ततो विषुवान्। अथोत्तरः पक्षः।
त्रयः स्वरसामानः विश्वजिन्नामैकाहः। पृष्ठ्यः षडहस्त्रयस्त्रिंशारंभणः। त्रयोभिप्लवाः षडहाः तान्यष्टा

म१ तं२ ध्याः २

३३

विंशतिरहानि। पुनः पृष्ठ्यः षडहस्त्रयस्त्रिंशाः जलः। चत्वारोभिप्लवाः षडहाः। स मासः। स द्वितीयः स तृतीयः स चतुर्थः। तत स्त्रयोभिप्लवाः षडहाः। आयुर्गौरिति द्वे अहनी। द्वादशाहस्य दशाहानि महाव्रतं चातिरात्रश्चेति द्वात्रिंशदहानि आद्येरष्टाविंशत्या होमिः सह षण्मासाः। तदेवं माप्यकारेण प्रायणीयोदयनीयमध्यवर्त्तिनो द्वादशाहिकीन्यनीकानां चोदकप्राप्ता मों स्थित्य विचारितं किं दंडकलितवदावर्त्तयितव्या किं वा नवानामप्यनीकानां स्वे स्वे स्थाने विवृद्धिरिति। तदर्थं विचारितं। ऐंद्रवायवाग्रं प्रथममहरित्यदृग्रहणं विवक्षितं अतश्च प्रथमादीनामङ्गानां गत्वा ऐंद्रवायवाग्रत्वादयोऽहरत्वं प्रयुक्ता उत प्रथमादीनां यत्नभागानां धर्माः परमाहत्वं प्रयुक्ता इति। तत्राहृग्रहणस्य श्रुतत्वादहर्धर्मत्वमतश्च प्रायणीयानंतरस्याह्नो धर्म ऐंद्रवायवाग्रता तदनंतरस्य शुक्राग्रता तदनंतरस्याग्रयणाग्रता गवामयनेपि तथैव प्राप्नोति। नव त्रिंश्चानीकैर्नवस्वहःसु समनुष्ठितेषु पुनरैंद्रवायवाग्रं प्रथममहरित्येतदेवोपतिष्ठते। तथा ततःपरमपि। तस्माद्दंडकलितवदावृत्तिरिति प्राप्ते सिद्धांतितं। उद्दिश्यमानस्याह्नि प्रथमादेरङ्गा विशेषणेन संभवति। तस्मात्प्रथममैंद्रवायवाग्रमथ शुक्राग्रमित्येतावद्विवक्षितं। नवानां चानीकानां नवधा विभागे गवामयनेपि पूर्वपक्षो नवधा विभज्य प्रथमादिभागेषु नवसु ऐंद्रवायवाग्रतादीनां नवानामनीकानामनुष्ठानं कर्त्तव्यमिति स्वस्थानविवृद्धिः सिद्धा भवति। एवं च कृत्वोत्तरपक्षसि पंचमे षाडहिके त्रयस्त्रिंशे हन्याग्रयणाग्रताद रामः २७

विश्वजिदाग्रयणाग्रे ३
अस्मिन्न आद्यमहर्द्वयं नत्याज्यं ४

र्श[stain]नमुपपन्नं भवति। जगती वै छंदांसि प्रत्यवरोहंत्याग्रयणाग्रहा बृहत्पृष्ठानि त्रयस्त्रिंशस्तोमा इति
। इंद्र कल्पितवदावृत्तावपि प्लवादारभ्य नवके रहः सुसंकल्प्यमाने पूर्वस्मिन्नपि पक्षस्यैकमहर्व्याप्यत्र्य
नीका समाप्यते। ततः पुनरैंद्रवायवाग्राभ्यामनुष्ठीयमाने द्वितीयमहरैंद्रवायवाग्रं तृतीयं शुक्राग्रं त्रयस्त्रिं
शमहरैंद्रवायवाग्रं प्राप्नोति। स्वस्थानविरहो पुनः पूर्वस्मिन्पक्षे आसीन नवधाविच्छेकेन नवमेह्नागे आग्रतायां। ४यणाग्र
मनुष्ठीयमानायामुत्तरे पक्षस्यारंभे प्रातिलोम्येनानुष्ठीयमाने प्रथमेह्नागे आग्रयणाग्रता भवति। तदं
तर्गतं च त्रयस्त्रिंशमहरिति तत्राग्रयणाग्रतादर्शनमुपपन्नं भवति। तदिदं भाष्यकारीयमधिकरणव्या
ख्यानं लिंगोपवर्णनं चानुपपन्नं। नह्यत्र चोदकेन त्र्यनीका प्राप्यते। अपि प्लवे हि ज्योतिर्गौरायुरिति ना
मधेयैरेकाहज्योतिरादिधर्मप्राप्तिः एकाहेषु च रथंतरसामस्वैंद्रवायवाग्रता बृहत्सामसु च शुक्राग्रता
तेनापि प्लवे विषडहे प्रथमतृतीयपंचमानां रथंतरसामत्वादैंद्रवायवाग्रता। द्वितीयचतुर्थषष्ठानां बृ
हत्सामत्वाच्छुक्राग्रता न तु त्र्यनीकाप्राप्तिः चोदकादपि बलीयो नामधेयमित्युक्तं बहुशोपि प्लवविका
राण्येव गवामयनेऽहानि। तेन न त्र्यनीकायाः दस्मृत्या चोदकेन त्र्यनीकाप्राप्तिस्तथापि नवधाविच्छिन्नागेन
युक्तः। नहि [stain]द्वादशाहे प्रायणीयोदयनीययोरंतरालं नवभिरनीकैः पूरितं किंतु दशभिः। दशमं चैंद्रवाय
वाग्रता। ऐंद्रवाय[stain]वाग्रौ प्रायणीयोदयनीयौ दशमं चेति वचनात् तस्य गवामयनेपि पूर्वस्मिन्पक्षे सिद

शुधाविनश्यमानेदशमोभागएंद्वायवाग्रः स्यात्। उत्तरस्मिंश्च पक्षेसिध्यातिलोम्येनानुष्ठीयमाने प्रथ
मोभागऐंद्रवायवाग्रः स्यात्तदंतर्गतं च त्रयस्त्रिंशमहरिति तत्राद्यैंद्रवायवाग्रतासांप्रतेराग्रयणाग्रतानु
पपत्तिः सिद्धांतेपिस्यात्। अपि च पूर्वपक्षे पूर्वधर्मेलुप्तानीकायागावामयनिके च षष्ठ्यामषडहेनामध्ये रा ३
नद्वादशाहिकषष्ठ्यामषडहधर्मप्राप्तेस्तत्र च त्रयस्त्रिंशस्याङ्क आग्रयणाग्रत्वादिहापियत्र क्वचिदवस्थि
३०६ तस्यापि त्रयस्त्रिंशस्याग्रयणाग्रताभवतीति विपरीतंलिंगं। अन्यानि च दूषणानि तेत्ररत्नएवदर्शि
तानीति नेहप्रपंच्यते। तस्माद्यथावार्त्तिकमधिवर्ण्यते। सत्यं न चोदकेनत्र्यनीकाप्राप्यते प्रत्यक्षे (?)
तुवचनेनत्र्यनीकाविधीयते। ऐंद्रवायवाग्रप्रथममहरथशुक्राग्रमथाग्रयणाग्रमथैंद्रवायवाग्रम
५७ थशुक्राग्रमथाग्रयणाग्रमथैंद्रवायवाग्रमथशुक्राग्रमथाग्रयणाग्रमिति। तत्र संशयः। किंमेतेदंडकलि अयता
तवदावर्त्तनीया उत नवधाविभज्य नवस्वपि भागेषु नवानामनीकानांनिवेश इति। तत्र प्रथममहरिति विशेषाः ७
८५ वचनादुत्तरेष्वप्यहर्गणस्यानुषंगात्प्रथमादह्नः ... रभ्यांतादैंद्रवायवशुक्राग्रयणानांव्यतिषंगेनाग्रत्व
मनेनवचनेनविधीयते। ऐंद्रवायवाग्रतांशुक्राग्रताग्रयणाग्रतेति त्रिष्वहःसु। तथा परेष्वपि त्रिषु। एवमां
ताकुर्यादिति वचनार्थं मन्यते पूर्वपक्षवादी। सिद्धांतस्तु। उद्दिश्यमानस्यभागस्याक्रोवाप्राथम्येन विशेषणासं राम
भवात्प्रथममहरिति वोद्दिश्यतत्राह रुद्दिष्टोहर्मात्रोद्देशाद्येति निर्देशानुपपत्तिः। तस्मात्प्रथममैंद्रवायवाग्र ३८
मथशुक्राग्रमित्येतावद्विवक्षितं। अहर्ग्रहणंत्वहःसंघाते। तस्मात्प्रथमादीनां भागानां धर्मः। नवानांवाग्रता

अ।५

नां विधानान्नवधा विभागः। गवामयने च धर्मा विधीयमाना अवांतरप्रकरणेन पूर्वस्मिन्पक्षसि नि वि
शंते। अतश्च पूर्वपक्षो नवधा विभज्य नवाप्यनीकानि निवेशनीयानि। तत्र चांत्ये भागे आग्रयणाग्रता भवति
उत्तरस्मिंश्च पक्षसि यत्पूर्वस्मिन्पक्षसि विहितं तत्प्रातिलोम्येनानुष्ठेयं। ततश्च प्रथमभागे आग्रयणाग्रता
भवति। तदंतर्गतं च पार्ष्ठिकं त्रयस्त्रिंशमहरिति तत्राग्रयणाग्रत्वदर्शनमुपपद्यते। दंडकलितवदावृत्तौ
त्वाद्ये द्वे अहनी वर्जयित्वा ऽनीकान्यारब्धव्यानि तयोरैन्द्रवायवाग्रतायाः आहत्य विधानात्। आदितो यावत्स्य
मागामासा द्वितीयेहन्याहत्य चोदितेनैन्द्रवायवाग्रत्वेन विरुध्येत। तस्माद्द्वे अहनी वर्जयित्वाऽभिप्लव[illegible] दि
का प्रथमाद्दशरात्रादारभ्य प्रवर्त्यंते। ततश्च पूर्वस्मिन्पक्षस्यांतिमे पर्याये सत्तानामङ्कानां परिशे
षात् समाप्तेव च्यनीका विषुवंतमुत्तरस्मिंश्च पक्षस्यैकमहर्व्याप्स्यते। ततश्चास्मो पूर्वस्मिन्पक्षसि पयसमा१
साकल्येनासंभवंती सामर्थ्यात्मकेन लिंगेनावांतरप्रकरणं वाधित्वा महाप्रकरणेन गवामयनस्य
विधीयमाना न सर्वस्य पक्षसो विहितेति शक्यं वक्तुं। यच्च पूर्वस्य पक्षसो विहितं तस्योत्तरस्मिन्प्रा
तिलोम्यमिति नव्यनीकायाः प्रातिलो म्यमित्यानुलोम्येनैवासावंतावर्तत इति त्रयस्त्रिंशेहन्यैं
द्रवायवा[illegible]नो ग्रत्वप्रसंगादाग्रयणाग्रत्वानुपपत्तिः। सिद्धांते तु विरोधाददित आर
भ्यमावर्तते उत्तरे च पक्षसि प्रातिलोम्येनाहत्तत्त्वपपन्नं लिंगं॥२७॥ ॥ छंदोव्यतिक्रमाद्बृहत्
क्षपवमानपरिधिकपालमंत्राणां यथाप्रतिवचनं ह्रस्वं स्यात्॥ व्यूढाख्ये केद्वादशाहे छंदोव्य

त्रिष्टुप्जगत्यो २

तिक्रमस्याम्नातः छंदांसि वाऽअन्योन्यस्यलोकमभ्यध्यायन्गायत्री त्रिष्टुभ्[illegible]
[illegible] जगती गायत्र्याइति। तत्र संशयः। किं रक्षाणां पवमानानां परिधीनां कपालानां च
मंत्रार्थवादेषु गायत्र्यादिशब्दैरभिलपितानां मंत्राणामर्थानां च छंदांस्यतिक्रमयितव्यान्युत मंत्रगता
नामेव छंदसां व्यतिक्रम इति। विशेषाज्ञानात्सर्वेष्वर्थेषु मंत्रेषु च छंदोव्यतिक्रमस्तेन गायत्रशब्दनिर्दिष्टः
प्रातःसवनीयो नक्षस्त्रैष्टुभशब्दितस्य माध्यंदिनीयस्य नक्षस्य स्थाने माध्यंदिने सवने कर्त्तव्यः। मा
ध्यंदिनीयश्च जागतशब्दितस्य तार्त्तीयसवनिकस्य स्थाने तृतीयसवने। तार्त्तीयसवनिकश्च प्रा
३५ तःसवने। तथा बहिष्पवमानो माध्यंदिने माध्यंदिनपवमानस्तृतीयसवने। आर्भवः पवमा
नः प्रातःसवने। तथा [illegible] माध्यमः परिधिः स्थविष्ठो [illegible] दक्षिणस्य स्थाने दक्षिणश्चाणीयानुत्त
रस्य। उत्तरश्चाणिष्ठो मध्यमस्य स्थाने परिधातव्यः। तथाष्टाकपालो माध्यंदिने। एकादशकपाल
स्तृतीयसवने द्वादशकपालश्च प्रातःसवने कर्त्तव्यः। तथा मंत्रगता गायत्र्यादिशब्दाः श्येनोसि गाय
यत्र छंदत्वा इति प्रासेभ्रूमः। मंत्रगतानामेव व्यतिक्रमो नार्थानां न ह्येतेषां गायत्र्यादिशब्दवत्वमस्ति।
स्तुतिमात्रं तु तेषु गायत्र्यादिभिर्निर्देशः। शक्यते त्वेकस्मिन्मंत्रे प्रकाशितं छंदो मंत्रांतरे गायत्र्यादिश ३९
ब्दप्रक्षेपेण प्रकाशयितुं। तस्मान्मंत्रगतानामेव छंदसां व्यतिक्रमः॥२८॥ ॥इति शास्त्रदीपिकायां द

३ ४ दा इत्यादृष्य [illegible] त्रिष्टुभादिशब्दानां सुपर्णोसि त्रिष्टुप्छंदा इत्यादीनां स्थाने सुपर्णोसि गायत्र
छंदा इत्येवमूहि ३ ४

मिथुनीसंभवावेति साऽब्रवीत् नवै त्वे ममालमसि जायात्येक वेदो मममहिमेति ह अस्त्वो चतुः साऽब्रवीन्नैव त्वानाममालं स्वो जायात्वे वेदो मममहिते तिता स्तिस्रो भूत्वोचुः साऽब्रवीत्संभवामेत्यथर्वाद आदिशदार्थः ४

प३ ध्या१

शमस्य पंचमः पादः॥ ॥ एकर्चस्थानि यज्ञे स्युः स्वाध्यायवत्॥ संति ज्योतिष्टोमे रथंतरादीनि स्तोत्रीया
मार णि सामानि। तानि किमेकैकस्यामृचि गेयान्युत तृचे इति संशये स्वाध्यायवेलायामेकस्यामृचि गीतत्वा
त्तद्वेलक्षणायाऽयज्ञेप्येकस्यां गेयुः। एकं साम तृचे क्रियत इति वर्तमाननिर्देशस्य रूपं न विधिरूपम
मिस्येतावान्पूर्वः पक्षः। ...माभावाच्चैतां घर्षवादविनावितविधिशक्तेरेकं साम तृचे क्रियत इति
वचनात्तृचे गातव्यानीति सिद्धांतः॥१॥ स्वर्दृशं प्रति वीक्षणं कालमात्रं परार्थत्वात्। रथंतरे प्रस्तू
यमाने संमीलयेदिति विधाय श्रूयते स्वर्दृशं प्रति वीक्षेतेति। तत्र संदेहः स्वर्दृशावृशस्य वीक्षणस्य च
कालार्थः संयोग उत गांगिसंयोग इति। तत्र कालार्थत्वे स्वर्दृशादृश्यांगं वीक्षमाणः स्वर्दृशादृमुच्चा
रयेन्नान्यथेति प्राप्ते ब्रूमः। अनपेक्षितसंबंधाद्वाक्यभेदप्रसंगतः। न युक्तो गांगिसंबंधस्तस्मात्काला
र्थतावरं। अभिवत्यैकदेशो हि स्वर्दृशावृदः पृष्ठस्तु सर्थत्वान्न वीक्षणं प्रयोजनमपेक्षते। स्वर्दृ
शादृः कर्तृवचनत्वाद्धृतीयांतत्वाच्च नो नुमंत्र्य नेन संबध्यमानः स्तूतिमेवालमस्ति निर्वर्तयितुं न वी
क्षतां प्रकाशयितुं। तथा वीक्षणमपि रागप्राप्तं दृष्टे नैव प्रयोजनेन निराकांक्षं न स्वर्दृशादृगांगतया वि
धातव्यं। संमीलनविधिनावावधि प्रतिपादनेनैकार्थ्यसंभवान्न वाक्यांतरत्वमवकल्पते। प्रतिशब्द
श्च स्वर्दृशादृस्य श्रुत्यैव लक्षणतामाचष्टे अतः कालक्षणो व्याख्या। तेनायमर्थः रथंतरे प्रस्तूय
१४ स्यलक्षणाप्रसंगाद्गांगिसंबंधात् ...व्याप... स्वर्दृशादावावीक्षणांगं। स्वर्दृशादं समु
च्चारयन्वीक्षेत नान्यथेति। वीक्षणे वा स्वर्दृशाद ४१

कृ वे

मानेसंमीलयेदास्वर्दृष्टुद्रोच्चारणात्तस्मिंस्तु कालेवीक्षेतेति॥२॥ पृष्ठ्यस्य युगपद्विधेरेकाहवद्विसा
सामत्वं॥ द्वादशाहे पृष्ठ्यः षडह उत्पन्नः तत्र षट्साम प्रक्रमेण रथंतरबृहद्वैरूपवैराजशाक
वतानि पृष्ठसामानि। गवामयनादिषु श्रूयते पृष्ठ्यः षडहो बृहद्रथंतरसामा कार्य इति तेन वैरूप २२
दिकं निवर्त्तते। बृहद्रथंतराभ्यामेव पृष्ठस्तोत्राणि नैयिनत्या। तत्र संशयः। किमेकैकस्मिन्नहनि द्वे
स्यातामुत क्वचिद्बृहत्क्वचिद्रथंतरमिति। तदर्थमिदं विचार्यते। किं बृहद्रथंतरे सामे इति द्वंद्वगर्भो बहु २५
व्रीहिः। बृहच्च रथंतरं च बृहद्रथंतरे इति प्रथमं द्वंद्वं कृत्वा पश्चाद्बृहद्रथंतरे सामनी अस्येत्यन्यप
दार्थे बहुव्रीहिः। उत कृत्वैव द्वंद्वमनेकपद बहुव्रीहिः बृहच्च रथंतरं च सामास्येति। तत्र द्वंद्वतत्पु
रुषयोरुत्तरपदे नित्यसमासवचनमिति कात्यायनवचनादेवं विषये द्वंद्वस्य नित्यत्वात्कृत्वैव द्वंद्वं
बहुव्रीहिः। तेनेतरेतरयुक्तयोः साम्नोः षडहसंबंधात्रैकप्रयोक्तव्यं तत्रेतरसहितमेव कार्यमि
त्येवमवगमादेकैकमेवाहो बृहद्रथंतरसामकं कार्यमिति प्राप्ते ब्रूमः। क्वचित्किंचित्स्यात्। एवमेकैक
स्येतरेतरनिरपेक्षस्य प्रापकश्रौतोदको नुगृहीतो भवति। न च वचनविरोधः। यद्यपि तावद्द्वंद्वगर्भो बहुव्री
हिः स्यात्तथापि षडहापेक्ष एवेतरेतरयोगो द्वंद्वे नावगम्यते न षडहावयवापेक्षः॥ [illegible] ॥ षडहापे
क्षश्चेतरेतरयोगः क्वचित्कस्यचिन्निवेशोपि न विरुध्यते। तत्र पदविभागेन निवेशप्रमाणं न स्यात्ततः सर्वत्र राम ४०

ना

द्वंद्वाच्चुदषहांतादिति टच्प्रत्ययः। वाक्त्वचप्रियः। गोरतद्धितलुकीति टच्प्रत्ययः। पंचगवधनः ४

तरेतरयोगः स्यादविशेषात्। अस्ति तु समाणं चोदकः। तस्मादेकस्मिन्नहन्येकमितरस्मिंश्चेतरस्य
योक्तव्यं। [illegible] न चावश्यं द्वंद्वगर्जोयं बहुव्रीहिः। विभाषावचनेन द्वंद्वस्यानित्यत्वात्। कात्यायनी
यं तु वचनं शब्दानुशासनपरत्वाद्यत्र सतो द्वंद्वतत्पुरुषयोरन्यतद्रूपमसतो वान्यद्भवति। तत्र समास
कृतरूपनियमार्थं तद्यथा वाक्त्वचप्रियः पंचगवधन इत्यत्र द्वंद्वतत्पुरुषयोरकरणे वाक्[illegible]यः पंच
गोधन इत्यकृत्वापि समासांतं प्रयोगः प्रसज्येतत्त्वा इत्यर्थं नित्यसमासवचनं। बहुद्व्यर्थं तरसामेत्या
दिषु तु द्वेधापि स्वरूपस्यानेदान्न्यायतोर्थानिर्णेतव्य इति प्रत्येकमपि चोदकानुग्रहाय यानेकपदव
हुव्रीह्याश्रयणं। तस्माद्वा क्विकिंचित्प्रयोक्तव्यं नप्रत्यहं द्वंद्वे स्यातां॥३॥ समासस्त्वेकादशिनेषु तत्
कृतित्वात्। द्वादशाहे श्रूयते एकादशिनाश्वायणी योदयनीययोरतिरात्रयोर्गालभेरन्निति। तत्र किं
सवेंद्रायणीयेस वेंचोदयनीये आलब्धव्या उत विरुद्ध्यके चित्प्रायणीये केचिदोदयनीय इति सं
शये प्रायणीयोदयनीययोः प्रधानत्वेनोद्देश्यत्वाद्द्वंद्वावगत साहित्यस्याविवक्षितत्वात्प्रतिप्रधा
नमेकादशिना आलब्धव्या इति प्राप्ते ब्रूमः॥ द्वादशाहप्रकरणेनवशागेव वचनांतरेणैकादशिनी विहि
ताप्रकरणाद्द्वादशाहांगत्वेनावगता सानुष्ठातव्या सती क्वप्रदेशे आलब्धव्येत्यपेक्षायां देशविधित्सा
यां प्रायणीयोदयनीयोऽश्रूयते तेन प्रधानतया। द्वादशाहस्य प्रधानस्यावगमात्। देशश्चांगं। न च प्रसंग क्लि॰ ४

मावर्त्तते। प्रधानं तस्माद्विनश्यात्वं नः॥४॥ सर्वपृष्ठे पृष्ठशब्दात्तेषां स्यादेकदेशत्वं पृष्ठस्य कृत्स्नदेशत्वात्॥
विश्वजित्सर्वपृष्ठो भवतीति श्रूयते। तत्र षाडह्निकानां रथंतरादिपृष्ठानां विधिरिति स्थितं सप्तमे। तत्र
संशयः। किं यज्ञामपि साम्नो पृष्ठस्तुतिसाधनत्वं ततश्च पृष्ठदेशे माध्यंदिनपवमाने मैत्रावरुणसा
म्नो मध्ये निवेश उत वैरूपस्यैव तत्साधनत्वेन तत्र निवेशोऽन्येषां स्तोत्रांतरसाधनत्वेन तत्तद्देशे प्रयो
ग इति। तत्र षडहे तेषां पृष्ठसाधनत्वेनाऽपि पृष्ठशब्देन तत्साधनत्वावगमात्पृष्ठदेश एव प्रयोगः
सर्वेषामिति प्राप्ते ब्रूमः। रथंतरं पवमाने कुर्याद्वार्नवैरूहन्मध्यत इतराणि वैरूपं होतुः पृष्ठ इत्यादि
वचनाद्वैरूपस्यैव पृष्ठसाधनत्वं इतराणि स्तोत्रांतरसाधनानि। न च पृष्ठस्तुतौ प्रयुक्तानामेव पुनर्वच
नात्स्तोत्रांतरेऽपि प्रयोगोऽस्त्विति वाच्यं। वैरूपस्य पृष्ठविधेरानर्थक्यप्रसंगात्। किंच। सर्वपृष्ठशब्देन
लक्षणया पृष्ठसाधनभूतानि रथंतरादीनि सामानि षाडह्निकानि विधीयंते स्तुतेर्बहुत्वाभावेन
सर्वशब्दविषयत्वाभावात्। तेषां च साम्नामिहातिदिष्टानां कार्याकांक्षिणां वाचनिकैरेव कार्यैरुपप
त्तौ को नाम सर्वेषां पृष्ठसाधनत्वं कल्पयेत्तस्माद्विनश्यैव निवेशः॥५॥ वैरूपसामाक्रतुसंयोगात्त्रि राम
वृदेकसामा स्यात्॥ उक्थ्यो वैरूपसामा एकविंशः षोडशी वैडं सामेत्यत्र किं वैरूपवैराजयोः ४१
साम्नोः सर्वेषु सामकार्येषु निवेश उत पृष्ठस्तुतावेवेति संशये विशेषाग्रहणात्सर्वेष्विति प्राप्ते प्र

२१२

तावेवं विधस्य निर्देशस्य रथंतरसामा बृहत्सामा वेति पृष्ठविषये दृष्टत्वादिहापि तेन प्रकृतिलिंगेन पृष्ठ
स्तुते बुद्ध्यारोहात्तद्वारेण च साम्नोः क्रतुसंबंधोपपत्तेः पृष्ठसाधनस्यैव रथंतरादेर्विकारो वैरूपादिः
॥६॥ त्रिवृति संख्यात्वात्सर्वसंख्याविकारः स्यात्॥ त्रिवृदग्निष्टुदग्निष्टोम इति श्रूयते। त्रिवृद्वीर्यं
त्रैगुण्यवचनो लोके त्रिवृद्रज्जुरित्यादौ वेदे च रशना त्रिवृद्भवतीति प्रयोगादवगतः। स्तोत्रीयानवक
वचनोऽपि वेदेऽवगतः। त्रिवृद्बहिष्पवमानमित्युक्त्वा स्तोत्रीयाणां नवानामनुक्रमणात्। तदेवमुभ
यार्थत्वे सति यत्र त्रिवृदग्निष्टुदित्यादौ वाक्यशेषादर्थविशेषो नावगम्यते तत्र विचार्यते किं त्रैगुण्य
वचनः सन्सर्वेषां क्रतुसाधनानां संख्याविकारः उत स्तोत्रीयानवकवचनः सन्स्तोमस्यैव विका
र इति। तत्र शास्त्रस्य महाविषयत्वलिप्सया सर्वद्रव्याणां त्रैगुण्यविधिरिति प्राप्ते ब्रूमः। त्रैगुण्यं ह्य
सो बुवन्नवयवप्रसिध्या भूयाद्व्यानु स्तोत्रीयानवकं। सा च बलीयसी। तस्मात्स्तोत्रीयासंख्याविका
र स्त्रिवृत्त्वं॥७॥ उभयसाम्नि विश्वजिति वृद्धिरागः स्यात्। यत्र संसवादावुभे बृहद्रथंतरे भवत इति श्रुतं त
मु३ त्र किमनयोः पृष्ठसाधनत्वमुतैकेन पृष्ठमितरेण स्तोत्रांतरं साधयितव्यमिति संशये चोदकेन वैकल्पिक
पृष्ठप्राप्तेस्तदनुग्रहायैकमेव पृष्ठसाधनमितरत्तु साम विश्वजिद्वत्स्तोत्रांतरेऽपि स्यात्। मैवं। विश्वजि
ति वाचनिकः कार्यांतरे निवेशो नात्विह तादृग्वचनमस्ति येन कार्यांतरे निवेशः स्यात्। तेन विकल्पेन प्रा

त्रयोः पृष्ठयोः समुच्चयमात्रं वचनेन क्रियते चोदकबाधस्तु स्तोत्रांतरसाधनत्वे पितुल्यः। तस्मा
त्पृष्ठएव निवेशः॥८॥ पृष्ठैरसंयोजनमावृत्ते संस्थिते त्रयस्त्रिंशेहनि स्यात्तदानंतर्यास्मृति
वत्। द्वादशाहे त्रिवृत्संचदशः सप्तदश एकविंशस्त्रिणवस्त्रयस्त्रिंश इति षडहं विधाय श्रूयते सं
स्थिते पृष्ठ्ये षडहे मध्वाशयेद्घृतं वेति। गवामयनादिषु पृष्ठ्यषडहस्य प्राति लोम्यं विहितं पृष्ठ्यः षडहस्त्रयस्त्रिं
शारंभणस्त्रिवृदुत्तमः कार्य इति। तत्र किं त्रयस्त्रिंशेहनि संस्थिते मधशनमुत षडहांत इति। तत्र त्रयस्त्रिं
शेहनि प्रकृतावनुष्ठितत्वात्तदंगं मधशनं मन्वानः पूर्वानुष्ठिते त्रयस्त्रिंशे तदंतएव मधशनं मन्यते। सिद्धांत
स्तु॥ द्वादशाहांगताप्यस्य गम्यते प्रक्रियावशात्। वाक्यात्तु षडहांगत्वं त्रयस्त्रिंशांगताक्रमात्। अनुष्ठानसा
न्निधिलक्षणेन हि क्रमेण त्रयस्त्रिंशांगता मधशनस्य स्यात्स करणात्तु द्वादशाहांगत्वं षडहांगत्वं समत्रि
व्याहाराद्वा। तत्र सत्यपि संस्थाशब्दे वैमृधवत्पौर्णमास्यां षडहस्यैवांगं। षडहावसाने च विधीयते न त्र
स्त्रिंशावसाने तस्मात्षडहांते स्यात्॥९॥ अभ्यासे च तदभ्यासः कर्मणः पुनः प्रयोगात्॥ यत्र षडहस्य पुनः
प्रयोगस्तत्र किं मधशनस्य पुनः प्रयोगः सर्वाभ्यासांते वा सकृदिति संशये षडहांगत्वात्तदावृत्तावावृत्तिः
षडह संस्थायाश्च पुनः पुनर्भावात्तन्निमित्तं मधशनमावर्तनीयं। मैवं। संस्था नाम तद्विषयव्यापारोपरमः। राम ४२
पुनः प्रवर्त्तमानस्य च नोपरमोस्ति। तस्मात्सत्यप्यंगत्वे निमित्ताभावान्नावृत्तिः। अंगत्वनिराकरणं तु न्याय्यं तिश

नन ५

योक्तमितिनातीवादर्त्तव्यं।१०॥ आरन्निस्कव्यवायेकात्तेदात्स्यात्॥ यत्रगवामयनादावग्निसुत्वादिन्निर्व्यवेतस्य
षडहस्याभ्यासस्तत्रापिकिं सर्वोत्तेमधशनमुतप्रत्यभ्यासमिति। पूर्वेणन्यायेनसर्वांतइतिप्राप्तउच्यते। अत्र षा
डहादुपरमेवाग्निसुवादिषुव्याप्रियते ननुपूर्ववदनुपरमः। तस्मान्निमित्तभूतसंस्थान्ते नैमित्तिकस्यमध
शनस्यावृत्तिः।११॥ मधुनदीक्षिता ब्रह्मचारित्वात्॥ सत्त्रमहीनश्च द्वादशाहः तत्र सत्त्रेमधशनेकर्त्तव्यं नेतिसं देहे यडा मानानाम मेव
सत्त्रेदीक्षितानामृत्विक्त्वाद्दीक्षितानां च ब्रह्मचर्यविधानाद्ब्रह्मचारिणश्च मधुप्रतिषेधा[illegible]कर्त्तव्यं सत्त्रेम
धशनं। नच वैगुण्यं घृताशनेनसाद्गुण्यसंभवान्मधशनं चाहीनविषयंतद्विष्यतीतिप्राप्तेऽभिधीयते। य
स्तावत्सातिपदोक्तो मधशनप्रतिषेधो ब्रह्मचारिणः स पुरुषार्थो न क्रत्वर्थं बाधितुमर्हति। विषयत्वेदात्।
यस्तद्यातिष्टोमेदीक्षितस्य क्रत्वर्थत्वेन ब्रह्मचर्यविधानादिहाप्यतिदेशेन क्रत्वर्थतया ब्रह्मचर्यप्रा
प्तौ ब्रह्मचारिधर्मगतो मधशनप्रतिषेधः क्रत्वर्थ तथापि[illegible]हः सम प्रत्यक्षविहितं मधशनं नाहीनविषय
त्वेन संकोचयितुमर्हति। वरमतिदेशस्यैवानुमानिकस्यांगांतरेषु संकोचः तस्मात्सत्त्रेमधशनंस्या
त्॥१२॥ मानसमहरंतरं स्याद्द्वादशाहव्यपदेशात्॥ द्वादशाहे दशमस्याह्नोऽधिकारे मानसो ग्रहः
श्रूयते। अनयापृथिव्यापात्रेणसमुद्रं रसेनप्रजापतये जुष्टं गृह्णामीति मानसं प्राजापत्यं गृ
ह्णातीति। तत्र संशयः। किमहरंतरचोदनेयं यागांतरचोदनेत्य[illegible]र्थः। उत दशमस्याह्नोंगभूतं ग्रहाभ्या
सांतरं चोद्यत इति। तत्र वाग्वै द्वादशाहो मनो मानसमित्या[illegible]त्यादिलिर्व्यपदेशान्द्वादिरिहैव तु

स ३

यजमानबहुत्वे चतुर्विंशतिपरमाः इति नियतेन विशेषितेः अन्नास्सनोपायि चोदितत्वं वक्ष्यमाणयजति चोदितत्व प्रयोगयोग्युक्तेः सत्रत्वा
सत्रतानुष्ठेयत्वरूपं सुत्रासमुदायत्वं यागार्थत्वे फलेभिसंयोगाभिलिप्सा प्रवृत्तिनिमित्तं तेन सामान्यशब्द एवायं उत्तरस्य

त्रिर्यागांतरशंकायामुच्यते। व्यपदेशभेदादेरवयवावयविभेदादप्युपपत्तेर्ग्रहणे चोदनानां चा
चोदकाच्च संस्काराइत्यत्र न संस्कारमात्रपर्यवसायित्वेन यागांतरप्रकल्पकत्वाभावाद्दशमेहनि मा
नसायप्रसर्पतीत्यादिदर्शनेष्वदशमस्यापि ग्रहाभ्यासांतरं नाहरंतरं॥१३॥ सत्रमेकः प्रकृतिवत्॥ स
त्राणि किं कामिन एवैकशः कुर्युरुत बहवः संहत्येति। चोदकानुग्रहादेकवचनस्य चैकैकशोपि लोके ब
हवः कामिनः सत्रं कुर्वंतीत्यनेनापि प्रायेणानुवादत्वोपपत्तेरेकैकशः कुर्युः। नैवं। आख्यातगता हि क
र्तृसंख्या प्रकृतिवदिहापि प्रयोगगतया विवक्षिता। न हि तस्याः किंचिदविवक्षाकारणमस्ति। सा च चो
दकप्राप्तमेकत्वं बाधते। तस्माद्बहवः प्रयुंजीरन्॥१४॥ अन्ये स्युर्ऋत्विजः प्रकृतिवत्॥ सत्रेष्वेव कि
मन्यैरार्त्विज्यं कर्तव्यमुत यजमानैरेवेति संदेहे चोदकानुग्रहादन्यैः। ये यजमानास्त ऋत्विज इति व
चनं यच्छब्दोपबद्धयजमानोद्देशेन तत्संस्कारार्थतयार्त्विज्यविधिः। न त्वार्त्विज्ये यजमानविधिः। तेना
र्त्विज्यमन्यैः कार्यं। यद्वाध्वर्युर्गृहपतिं दीक्षयित्वेत्यनेन र्त्विजां संस्कारार्थेन दीक्षा विधीयत इति तद्यो
गादृत्विगेव यजमानशब्दगोचर इत्यनुवादः। नैवं। अपाकृतकार्यत्वप्रसंगात्। वचनानर्थक्याच्च। न चा
र्त्विज्यस्य यजमानसंस्कारत्वं। अपाकृतकार्यप्रसंगादेव। तस्मात्स्वाकृतकार्यस्यार्त्विज्यस्य यजमा
नाः कर्तारो विधीयंते। अतोन्येषां चोदकप्राप्तानां बाधः॥१५॥ द्वादशाहस्य सत्रत्वमासनोपायिचोदने
न यजमानबहुत्वे न च सत्रशब्दाभिसंयोगात्॥ यजतिचोदनादहीनत्वं संख्यामिनां चास्थितपरिमा(णा)

प्रथमे सर्वेष
क्षांनिरस्यहि
तीयेनिरस्यति

रा
४३

ये यजमानास्त्य ४

ने नयजेरन्निति तेन तो सत्राहीनशब्दौ योगरूढाविसारायः २

त्वात्। सत्रप्रसंगाद्द्वादशाहगतस्य सत्रस्वरूपस्य लक्षणं तत्प्रसंगाच्च नक्तं तस्यैवाहीनरूपस्य लक्ष
णं सूत्रद्वयेनोच्यते। तत्रत्र यो दशरात्रादिष्वासनोपायिचोदनेषु वेदध्येत्तृ प्रयोगेषु च सत्रशब्दः श्री
नाद्द्वादशाहेऽपि प्रयुज्यमानस्य सत्रशब्दस्य तन्निमित्तता। द्विरात्रादिषु च यजतिचोदनेष्वहर्गणेषु अ
हीनशब्दः दर्शनाद्द्वादशाहेऽपि नदैवतस्य निमित्तं ॥१६॥ अहीने दक्षिणा शास्त्रं गुणत्वात्प्रत्यहं कर्मभेदः
स्यात्। पौण्डरीको नामाहीन एकादशरात्रः। तत्र श्रूयते अयुतं दक्षिणाश्वसहस्रमेकादशमिति। तत्र
संशयः। किमयुतमश्वसहस्रं च प्रत्यहं दातव्यमुतैकमेवायुतमश्वसहस्रं च दातव्यमिति। तत्र दक्षि
णाया हरंगत्वात्प्रत्यहं भेदमर्हति। एकप्रयोगपाताननु तंत्रेणैकाप्रदीयते। सत्यं प्रत्येकमङ्गाङ्गं दक्षि
णा तथापि कर्त्रानतिद्वारत्वात् कर्तृणां च विकीर्षितार्थमुपादानादेकप्रयोगचोदितानामेकादशानाम
प्यङ्गानां युगपच्चिकीर्षितत्वात् तंत्रेण सर्वेषां पुरुषाणामुपादानं। तदानतिश्चैकैव तंत्रेण। तत्सिध्यर्थं च द
क्षिणेति सापि तंत्रेणासंभवादेकैव दीयते। ननु पौण्डरीकप्रकृतौ द्वादशाहे प्रत्यहं दक्षिणाभेदेन दत्ता।
अन्वहं द्वादशशतं ददातीति वचनात्तेनेहापि द्वादशानां विकारे युतमश्वसहस्रं च प्रत्यहं भेदमर्हति। उ
च्यते। द्वादशाहेऽप्येकप्रयोगत्वादेकैवानतिरिति प्रत्यहं द्वादशशतेदीयमाने यावतीनवतिता वतीदक्षि
णैकैव। तस्मादिहाप्येकमेवायुतमश्वसहस्रं च दातव्यं ॥१७॥ प्रत्यहं सर्वसंस्कारश्च कृतिवत्सर्वासां

द्वादशाहीनस्यैतस्यैवं विधानो अंगानां सत्राद्दुर्द्वयस्साय पृष्ठ
शमनीयेन यजेरन्नित्यादीनी च अयवस्थार्थः

सर्वशेषत्वात्। प्रकृतौ माध्यंदिने सवने दक्षिणानयनं क्रतं पौंडरीके चायुतमश्वसहस्रं माध्यंदिने सवने
प्रत्यहं नेतव्यमुते कस्मिन्नहनि अथवा विरुद्धप्रत्यहं सहस्रं नेतव्यमश्वसहस्रं त्वेकादशेऽह्नि नेयमिति सं
शये प्रकृतौ वाक्यमीये माध्यंदिने सवने नीतिती हापि प्रतिकर्मावसायी वादकः प्रति माध्यंदिनं नयनं प्रतिपा
दयति। समस्ता चेयं सर्वेषामङ्गं दक्षिणा तस्य वैचप्रत्यहं नेतव्या। दक्षिणासंस्कारतान्न पनस्य सकृत्सं
स्कृतायाश्च न पुनः संस्कारेण प्रयोजनमित्येकस्मिन्कस्मिंश्चिन्माध्यंदिने नयनं। नैवं। द्वादशाहे तु विरु
द्धनयनं विहितं। तत्र अन्वहं द्वादशशतं [illegible] ददातीति। तेनेहापि विरुद्धप्रत्यहं देवनयनं ॥१८॥ लिंगेन द्रव्यनिर्देशे
सर्वप्रत्ययः स्याल्लिंगस्य सर्वगामित्वादिति यवत्॥ क्वचिद्धि कृतोऽस्य यतेमनोश्रीचः सामिधेन्योऽनवंतीति। त
त्र किं सर्वा एवमनोश्रीचः सामिधेनीत्वेन वक्तव्याऽऽहो यावतीभिः संख्या पूर्यते प्राकृतीतावत्य एवेति। प्रत्य
क्षेण वचनेन सर्वासामविशेषाणप्राप्तवगमाच्चोदकप्राप्तसंख्याबाधेन सर्वासामुपादानमित्येतावान्पू सा६
र्वः पक्षः। नावश्यं प्रत्यक्षवचनेन सर्वासां प्राप्तिः। नहीदमर्कसंस्कारार्थं। अग्निसंस्कारार्थं ह्यत्र यद्उपादी
यते। तत्र बहुवचनात्त्रित्वेषामेव त्रित्वमतिक्रम्य पंचदशोपादीयंते। अधिकानां त्वनाशंक्यमेवोपादानं॥
॥१९॥ वाससामानोपाहरणे प्रकृतौ सोमस्य वचनात्॥ ज्योतिष्टोमे सोमस्य मानमुपावहरणं च वासः राम
साधनकं वाससि मिमीते वाससोपावहरतीति वचनादित्युत्तरविवक्षया प्राप्तिः क्रियते॥२०॥ तत्राह गर्गणे ४४
थद्वासः प्रकृतिः स्यात्॥ स्थितं वाससि मानं वाससा चोपावहरणमिति। द्वादशाहाद्वावहर्गणे किं मुपावह :

सामिधेन्यनुवचनं ५ समिंधनप्रकाशनार्थं ५

वस्त्रेस्य प्रतिपन्नः कतरद्वा ग्राह्यमितिसंशयोथसंशयमाहकिमिति

नेदमिति। उपावहरणवाससोमो ध्यंदिनीयमन्तात्सिषवकाले यावसक्तेतदानीं विहितं तदेवोपावहरणांगं वस्त्रांगतया द्वाध्यं नप
ध्येकत्वन्यायेन साक्षादुपावहरणांगं न चप्रतिनिधेरपि सर्वधावाधः सर्वोतिकरणादित्याशयः॥ अर्थादिति। नेदं दानवासः
प्रतिपत्तिः किंतु यावत्सक्तेदर्श्यं चतुर्थसंयोगात्प्रयस्तोत्रीया अनुष्ठुवाणस्य तस्योत्साहजननेन दृष्टार्थत्वाच्चेमेवोपावहरणदंड
रणार्थं प्रत्यहं वाससोऽभेदः स्यादुत नेति। भेदे प्रमाणाभावान्नेति प्राप्ते ब्रूमः। अर्थाद्वाससोऽभेदः स्यात्। अहर्विघ
नेशकटे वस्थितः सोमः प्रत्यहं भेदेनाभिषवार्थं यावानेकस्याङ्गः पर्याप्तस्तावान्वाससोऽपावहर्त्तव्यः। अवशि
ष्टश्च शकट एव वाससोपनद्धो वतिष्ठते। तस्मादर्थादहर्भेदे वासोंतरमुपावहरणार्थमुत्पादयितव्यं॥२१॥
मानं प्रस्तुत्य दयेत्प्रकृतौ तेनैव दर्शनादुपावहरणस्य। यदेतदुपावहरणार्थमन्यद्वासउक्तं घ्यतेतत्किं मान
काल एव स्यादाहो मुतो पावहरणकाल इति संशये प्रकृतौ यस्मिन्वाससि मिश्रयकाले मानं कृतं तेनैवाभिषव
वेलायामुपावहरणस्य दर्शनादहर्गणेपि मानवाससोपावहरणेन भवितव्यं। तस्मान्मानकाल एवोत्पा
द्यं। नैवं। आर्थिकं हि प्रकृतो मानवाससोपावहरणं न शास्त्रीयं। एतावद्धि श्रूयते वाससोपावहरतीति। तत्र प्र
कृतौ यस्मिन्वाससि सोमो मितः उपनद्धश्च शकटे स्थापितस्तेनैव सौकर्यादुपावहरणमनुष्ठितं अहर्गणे तु
मानवेलायामनुपपत्त्यभावादेकस्मिन्नेव वाससि सर्वेषामङ्गां सोमे मितो पनद्धस्थापिते तस्मिन्नभिषववेला
पा [illegible] मुपावहरणार्थमनुपपत्तेरन्यदुत्पाद्यते॥२२॥ ॥ इति शास्त्रदीपिकायां दशमाध्यायस्य षष्ठः
पादः॥ ॥ पशोरेकहविष्ट्वं समस्तचोदितत्वात्॥ अग्नीषोमीयं पशुमालभेतेत्यत्र संशयः किं कृत्स्नः
पशुरेकं हविस्तेन च देवतायै दीयमानेन पयो विक्रियते तत एकदा वदायहोम उत पञ्चांगं हृदयादिहवि
रिति। तत्र। तद्धितेन पशोरेव देवतान्वयचोदनात्। समस्तस्य पशोर्दानमेवं हृदयस्यापयसोयथा। हृदयस्या
ग्रेवद्यत्यथ जिह्वाया अथ वक्षस इत्यादीनि वचनानि पशोरेवावदान प्रदेशलक्षणार्थानि मध्य प्र

वैगुण्यापत्तेरित्याशयः। १४ व स्या १

वीर्धवच्चनवत्। हृदयप्रदेशेवद्यतीत्येकादशानां चप्रदेशानामुपदेशाद्यवदानमपोद्यैकादशत्वोवदायहू
यते। तस्मिन्नेवचकालेसमस्तः पशुर्देवतायेत्यज्यते पुरोडाशवत्तस्मात्पशुरेकं हविरितिप्राप्तेब्रूमः। खंडनै
षाकृतार्थं हि हृदयादिषु दृश्यते। तस्मात्तत्प्रकृतित्वेनदेवतासंगति । हृदयादिशब्दाहि मांसविशेष
वचनानयुक्तं यस्यप्रदेशलक्षणार्थतां नीयंते। हृदयादीनामेवावदानोपपत्तेः। अ वदानंचप्रकृतौ हवि
संस्कारार्थमितीहाप्यवदानं हविष एव युक्तं। तच्च हृदयादिषु दृश्यत इति हृदयादीनामेव हविष्ट्वं निश्चीय
ते। नचोत्पत्तिवाक्यशिष्टपशुविरोधः। तस्य हृदयादिप्रकृतित्वेन यागसाधनत्वेपि देवतासंबंधोपपत्तेः। यदि
हि प्राणाज्ञां प्रमाणेन स्यात्ततः पशुरेव साक्षाद्दीयेत। अस्तितु प्रमाणं हृदयादिषु अवदानवचनं विशस
नवचनंच। तस्माद्धृदयादीनि हवींषि देवतायै देयानि ते भ्य एव चद्यवदानं गृहीत्वा दृश्यते तत्प्रकृति
श्च पशुः॥१॥ तद्भेदात्कर्मणोभ्यासस्तस्मात्तेभ्योवदानं स्यात्॥ पश्वंगानि हवींषीति स्थिते चिंत्यते किमे
केनकेनचिदंगेन यागः कर्तव्य उत सर्वैरंगै रथवा हृदयादिभिरेकादशभिरिति। तत्र। एकेनापि पशोर्याग
साधनत्वोपपत्तितः। तन्मात्रेणैव यागः स्यात्सर्वैर्वा युगपन्मतेः। पश्चात्कृतिर्हि देवतासंबंधित्वेनश्रुता ते
नतयापरिच्छिन्ने नद्रव्येणयष्टव्यं। साचावयविद्रव्यं साक्षात्परिच्छिनत्ति। तस्यैव विशसनादिविधानान्न
साक्षाद्यागसाधनता संभवतीति तदवयवानामवयविद्वारेण पश्चात्कृत्यापरिच्छिन्नानां साधनत्वं
। अवयवी चावयवेषु व्यासज्य वर्तमानः सहैव सर्वावयवेषु प्रियमादधातिन जातिरिव व्यक्ति

=पाठप्राप्तत्वादेकादशेति पुनः श्रवणं परिसंख्यार्थं। एकादशेत्येकतानीत्यार
भ्यादितीयं वाक्यं =

षु प्रत्येकं। अतोऽविशेषतः सर्वैर्यष्टव्यं। हृदयादिवचनं तु ह्यवदाननियमार्थं। एवं हि श्रूयते एका
दश वै पशोरवदानानि तानि द्विर्द्विरवद्यतीति। नियमश्चानेनैवं। एकादशैवावदेयानि नाधिकानीति किं त
र्हि यान्येकादश तानि द्विरवद्यति नाधिकानीति। तेनाधिकान्यंगानि पशोः पंचावदानवचनात्त्रिस्त्रिरव
द्यंते। तस्मात्सर्वेभ्योऽवदेयं। नैतदेवं। अविशेषाद्धि सर्वेषां हविष्ट्वमवगम्यते। अवदानवचोभ्यस्तु विशे
षोऽत्रावधार्यते। यदा हि हृदयादीनामवदानवचनेन हविष्ट्वमवगतं तदा तत्प्रकृतित्वेनैव पशोर्देवतासं
बंधोपपत्तेर्न किंचिदंगांतराणां हविष्ट्वे प्रमाणमस्ति। न च हि संख्यार्थं हृदयाद्यवदानं भिन्नवाक्यत्वा पृ ६
त्। हृदयस्याग्रेऽवद्यत्यथ जिह्वाया अथ वक्षस इत्यादीन्यवदानविधानानि। एकादश वै पशोरवदानानि
तानि द्विर्द्विरवद्यतीति संख्याविधानं। तस्माद्धृदयादिभ्यः परिगणितेभ्योऽवदानं नाधिकेभ्यः॥२॥ इज्य
५६ शेषात्स्विष्टकृदिज्येत प्रकृतिवत्॥ पशावेव चोदकप्राप्तः स्विष्टकृद्यागः किं प्रधानहविर्भ्यो हृदयादिभ्य
उत्तरार्द्धं गृहीत्वा कर्त्तव्य उतांगांतरेभ्य इति संशये प्रधानशेषप्रतिपत्त्यर्थत्वात्प्रकृतौ पशावपि प्रधानशे
षेभ्यः कर्त्तव्यः। त्र्यंगैः स्विष्टकृतं यजतीति वचनं चोदकप्राप्तेषु सर्वेषु प्रधानहविष्षु त्रित्वविधाना
र्थं। तेन तेषामेव मध्ये त्रिभिः स्विष्टकृदिज्येति प्राप्ते ब्रूमः। त्रित्वं नांगानुवादेन विधातुं शक्यते न तथा। त
स्य प्रसरश्छेदेन सामर्थ्यं हि विहन्यते। एकं हीदं समासपदं त्र्यंगैरिति तदेकप्रसरसंयुक्तं सकलमुद्देशकमुपा
दायकं वा। उभयार्थे तद्विधा एवार्थे विधीयमाने प्रसरच्छेदात्सामर्थ्यविघातात्समासो न स्यात्। अपि च

प्रत्याम्नानमेवाक्षिपति नन्विति। नवमे अभ्युदयेष्टौ हविःश्र =याग ४= पणानंगभूतयोरपि दधिपयसोर्हविःश्रपणाङ्गभूत
तप्रणीतास्वानाम्‌ ... न्यायेन स्विष्टकृदंगभूतानामपि ... अंगानां स्विष्टकृदनंगभूतहृदयादिस्त्रानाम

दोः पूर्वार्द्धस्य गुदं मध्यतः श्रोणिं जघनार्द्धस्येति वाक्यशेषेऽनिड्याशेषम ...
... शेषाणां कीर्तनादि स्विष्टमनिड्याशेषाणां विधानं। तेश्च प्रत्याम्नानादिड्याशेषाणां
बाधः। नन्वनिड्याशेषाणामंगत्वेन विधानादिड्याशेषाणां च चोदकेन प्रतिपादितया प्रधानत्वेन प्राप्तानां
विषयभेदाद युक्तो बाधः। प्रधानभूतानामपि निर्वर्तकत्वात्तस्मिं श्चांशे निड्याशेषाणां विधानादर्थिक्रु
मस्येवतुल्यविषयत्वं। नत्वनिड्याशेषैः क्रियमाणो यागस्तेषां प्रतिपत्तये लं भवति। तेन गुणभूते
रपि युक्तः प्रधानबाधः। किं चानिड्याशेषाणामपि हृदयाद्यर्थात्लब्धपञ्चनुतिष्यन्नानामाकीर्णक
राणां प्रतिपत्त्यपेक्षत्वाच्चोदकेनेड्याशेषप्रतिपत्त्यर्थतया प्राप्तः स्विष्टकृद्यागस्तत्प्रतिपत्तौ वचनेन वि
नियुज्यते। यत्स्विष्टकृता प्रतिपाद्यं तदंगानि न हृदयादीनि। तस्माद्युक्तो बाधः॥३॥ अध्रूध्नी होतुस्त्वं
गवदिडान्तस्य विकारः स्यात्। पशावेवश्रूयते अध्रूध्नी होत्रेहरतीति स्वयमध्रूध्नी किं प्राकृतस्य होतुरिडा
न्तस्य विकार उत नेति। यद्यन्यताप्राप्ता ध्रूध्नीयं विधीयते ततो विकारः अथ पक्षे होतुः प्राप्तास्ततो नियम
तस्ततोऽविकारः। तत्रानस्थिनिरिडां वर्द्ध यन्तीति वचनादिडायामंगेनेताध्रूध्नी डायां ... विधिर्विनश्यन्त
स्यमाणायां कदाचिद्भक्षलोपे स्यात् कदाचिदन्यस्मिन्नागे नियम्यते ततो यजुर्युक्तरथवन्नेडाभक्षस्य
विकार उच्यते। अनस्थि निरिडां वर्द्धयन्तीति वर्तमानापदेशसरूपत्वादनुवादोयं। कथं प्राप्तिः। अथ
यत्सरिशिष्टं तत्समवत्तधान्यामानयतिय हृदयप्रास्यतिति क्रांवक्षस्तनिमवतस्यवनिष्ठुमिति। नच

राम ४६ ५

डायां १

४६

मानतभागे ३

स्त. शिम्ने ७
तनिमातनुत्वंतद्भूतःसूक्ष्मा अवदी
यमानेबर्हिषिपतिलाः खंडाः १

तन्मध्ये ध्यूध्नी कीर्तिता। तस्मादस्या पातेन नैवं वचनव्यक्तिः यदध्यूध्नीं हरंति तद्धोतुरिति किं तर्हि यदिडा हरं द्रो १
ति तदध्यूध्नीमिति प्राकृतं होतृसंप्रदानकं हरणमध्यूध्नीप्रतिपादने विनियुज्यते। तस्मादिडा भक्ष विकारः।
॥४॥ अग्नीधश्च वनिष्ठुरध्यूध्नीवत्॥ तत्रैव श्रूयते वनिष्ठुमग्नीधे हरंतीति तत्रापि पूर्ववदेव संशय पूर्वो
त्तरपक्षाः। विशेषाशंका तु वनिष्ठोरिडायां प्रासेन वचनाद्भक्षप्राप्तिरिति। सत्यमस्ति प्रासनं तत्त्विडासंस्का
णा ५ रार्थं उपस्तरणादिवत् अतो नास्येडात्वं। न भक्षसंयोगोस्य भक्षयितुं प्राश्नातीति। नं चतुर्थीनिर्देशः प्रासनवि
धावस्ति। तस्मादग्नीधे वनिष्ठुमग्नीधे वनिष्ठुमिति चतुर्थ्यन्तात् संप्रदानके हरणे विधीयत इति प्राकृतस्यै
व भक्षस्य विकारः। ५॥ अप्राकृतत्वान्मैत्रावरुणस्याभक्षत्वं॥ मैत्रावरुणो नामास्ति पशौ ऋत्विक् तस्य किमिडां
भक्षयेन्न वेति संदेहे। नास्य प्रकृतितो भक्षः प्राप्तोऽप्राकृतो ह्यसौ। होत्राध्वर्युवत्कारित्वात्कार्यतस्त्वस्ति
भक्षणं। प्राकृता हि भक्षाः प्राकृतकर्तृनियमांशेन कर्तृसंस्कारार्था अपि त्विहमतो ध्वर्युहोतृसंस्का
रत्वाद्भक्षस्य मैत्रावरुणे प्रैषकरणादध्वर्युकार्यमनुवचनकरणाच्च होतृकार्यं कुर्वाणेऽस्ति प्राप्तिः। ६॥
द्विभागः स्याद्विकर्मत्वात्॥ किमयं मैत्रावरुणो द्वौ भागौ भक्षयेदुतैकमिति। द्वयोः कर्म कुर्वन् द्वौ लभेतेति
प्राप्ते ब्रूमः अध्वर्योर्यावती तृप्तिर्होतुस्तृप्तिश्च यावती। तत्र एतावती तृप्तिर्भागेनैकेन लभ्यते। तस्मादेक
भागः स्यात्॥ ७॥ प्रतिप्रस्थातुश्च वपाश्रपणात्॥ तत्रैव प्रतिप्रस्थातुरिडायामस्ति भक्षो न वेति संशये। अ

धर्युकार्यं द्विहविः श्रपणमसौ च करोति वपाश्रपणं तस्माद्भक्षयेत्। सत्यमसौ वपां श्रपयति तत्स्यात्
सर्वप्रदानत्वान्नास्ति शेषः। प्रकृतौ च यस्याः सर्वस्य यः कर्त्ता स तच्छेषस्य भक्षयिता। स्विन्नं चांगारैर्वे
वपाः सर्वमतस्तस्य कर्त्ता प्रतिप्रस्थाता तच्छेषमेव भक्षयितुमर्हति। सा च निःशेषा। तस्मान्नास्य भक्षः।
नन्वंगेभ्योपि हृदयादिभ्योयमवदानं कुर्वन्भक्ष्यं लप्स्येत। दक्षिणतो निधाय प्रतिप्रस्थातावद्यतीति वच
५ त्राय नात् स्यांशा सर्वयामध्वर्योरेवावदानं तद्विषयमिदमधिकरणं। प्रतिप्रस्थातुरवदानपक्षे तस्यैव भक्ष
कृत्ययमेव परमार्थपरिहारः। यत्प्राकृतमिदमवदानं प्राकृतकार्यं च प्रदानं तत्त्वान्नावादित्युक्तं। तद म ६
युक्तं। यद्यपि दैवतान्यवदाय न तावत्येव होतव्यं सौविष्टकृतान्यवद्यतीति मध्ये पदार्थांतरविधानान्ना
यं प्रदानारंभस्तथापि प्रदानार्थमेवेदमवदानं नादृष्टार्थं। तथा चावदानदर्शनाद्धृदयादीनां हविष्ट्व
अ५ मुक्तं दृष्टार्थे वदाने हि न तेषां हविष्ट्वं सिध्येत्। तस्मादवद्यन्प्रतिप्रस्थाता लभेतैव भक्षं। अध्वर्य्ववदा
नपक्षे तु नास्य भक्षो वपाया निःशेषत्वादित्येतावाननधिकरणार्थः॥ ८॥ विकृतौ प्राकृतस्य विधेर्ग्रहणा
त्पुनः श्रुतिरनर्थिका स्यात्॥ चातुर्मास्येषु साकमेधीयपर्वणि गृहमेधीयेष्टिः। तत्र श्रूयते आज्यभागौ
यजति यज्ञतायाइति। तदिहाज्यभागश्रवणे द्वौ पक्षौ विचार्यते किं चोदकप्राप्तानुवादमात्रमुत द्वाभ्यां एम
विधानमपूर्वं वा कर्मांतरविधिर्वा परिसंख्या वा तद्दर्शातिदेशो वा तयोरेव वाति देशात्स पूर्वो ४७

र्थवादा १

वागट्ट मेधीयेतितेऽप्रकृतितः प्राप्तेश्चोदकेनाज्यभागयोः। गुणान्तरस्याभावादनुवादत्वमिष्यतां। आ-
नर्थक्यप्रसंगात्पुनर्वचनेतदुदयंगमं। तस्मादुनाभ्यां विध्यन्तो दार्विकोऽत्र विधीयते। आज्यभागश्रवणं नि-
र्वपत्वादिश्रवणवत्प्रकृतिसादृश्यमापादयच्चोदकस्य निमित्तं भवति। चोदकस्त्वैष्टिकं विध्यन्तं नियत-
च्छतीत्येवमनुनाभ्यामैष्टिकविध्यन्तविधिः। नैतदपियुक्तं। औषधद्रव्यकत्वादेवैष्टिकातिदेशसिद्धेः। त-
स्माच्चोदकप्राप्तैष्टिकविध्यन्तप्रशंसार्थमिदं। एवमयं दर्शपूर्णमासविध्यन्तः प्रशस्तो। यत्राज्यभा-
गावपि स्तः सोऽवयज्ञतायाइति। विध्येकवाक्यत्वाभावादिदमप्यन्याय्यं। तस्मात्कर्मान्तरविधिः। प्र-
न७ सिद्धाज्यभागप्रत्यभिज्ञानात्तदपि सारं। तस्माच्चोदकेन सर्वेष्वङ्गेषु प्राप्तेष्वाज्यभागयागपुनःश्रवणं
समिदादियागानां परिसंख्यार्थं। आज्यभागावेव यजति न समिदादीति। तदप्यनुपपन्नं। परिसंख्या-
यास्त्रिदोषत्वात्। तस्मात्प्रत्यक्षवचनसिद्धत्वादाज्यभागयोस्तद्वर्जमन्यान्यङ्गानि चोदकः प्रापयति।
तदप्यचतुरस्रं। नहि चोदकस्य प्रत्यंगं व्यापारभेदोऽस्ति येनाज्यभागविषयेन व्याप्रियेत। एकेनैव व्या-
पारेणासौ सर्वाण्यङ्गानि प्रापयति। तेनैव चाज्यभागयोरपि प्राप्तत्वादनर्थकमेव पुनःश्रवणं स्या-
त्। तस्माच्चोदकोपसंहारोऽयं प्रकृतिवत्कुर्यात्किं सादृश्यमाज्यभागौ यजति। तदप्यपेशलं। नहि प्रस-
क्षश्रुतातिदेशोऽयं येनैवमाश्रीयेत कल्प्यो ह्यसौ। न यदि कल्प्यते पितस्मिन्नाज्यभागावेवानुष्ठातव्यौ।

नचोपहोमरूपमेवाभेक्षितं कथमिति प्रकारापेक्षणादिति वैषम्यमित्याहुः। अस्तु वांगविषये च कथमित्यपेक्षा नोपकारविषये
ति तथापि आनर्थक्यापत्त्यैव प्राकृतांग पुनः श्रुतौ तावत्तेन नैराकांक्षे कां पुनः उपहोमेषु तु नानर्थक्यमिति नारब्धे तस्याशये

तयोः प्रत्यक्षेणैव वचनेन सिद्धेरनर्थकत्वाद् कांगीकारः। तस्मादसर्वत्वे वस्या गृहमेधीयकर्मणः प्रा नोहीकं च
कृतांगनिराकांक्षं न तच्चोदकमर्थयेत्। आज्यभागयोर्हि प्रकृतौ कृत यागरूपव्यतिरेकेण प्रकरणाम्ना ति ८
नकल्पितं स्वाहास्वर्वद्वारेण यागगतव्यापारं त्यागगतं व्यापारमपेक्षमाणः प्रत्यक्षवचनविहिताज्यभा
ग निराकांक्षो न प्रकृतिमपेक्षते। विकृत्यं त x रूपमपरमस्ति। तद्रूपलक्षणार्थं चेदमाज्यभागश्रवण
मन्यथानर्थक्यात्। अतश्च गृहमेधीयप्रयोगवचनो x रे यानि त्व प्राकृतान्यामनहोमादीन्यंगा
नि तेषां यागगतव्यापाररूपस्याक्लृप्तत्वात् तद्रूपा.पेक्षः प्रयोगवचनः सन्निहितान्यपि तान्यतिक्र
म्य प्राकृतान् क्लृप्तोपकारान् गृह्णीयात् पश्चात् समीपाम्नातानां नर्थक्यपरिहृति हीयता गानि आ ९
न्यथा किं गृह्णातीति न तेश्चोदकलोपः। किंच। यदि गृहमेधीयप्रकृतिः सर्वः स्यात् नाज्यभागग्रहणं क्रियेत
ग कृतं च तदन्तो वेद्धामो नू नमत्र नास्ति चोदक इति। तस्माद्यत्र प्राकृतमंगं निर्गुणं श्रुतं तत्रासर्ववत्
॥९॥ ॥ ततोपि यावदुक्तं स्यात्॥ गृहमेधीय एवास्विष्टकृदिडादिकं कर्तव्यं नेति संदेहे। निराकांक्षत्वा
दाज्यभागाभ्यां न कर्तव्यं। प्रेक्षक्कृतत्वाद्विशेषात् तु कर्तव्यं। न च विकल्पः। सकृतात् विवेषकर
त णेन सर्वेषामुपग्रहणात्॥१०॥ स्विष्टकृति न चास्ति प्रतिषेधः स्यात् तुल्यकारणत्वात्। गृहमेधीय ए राम ४८
व प्राकृतांग पुनः श्रवणं परिसंख्यार्थमिति कृत्वा चिन्त्यते। तदा हि समानजातीयमेव शीघ्रापस्था

त्य३

नात्परिसंख्यायते नान्यत्रे नाज्यभागाभ्यां याज्यान्तराणि परिसंख्यायन्ते न शेषकार्याणि। स्विष्टकृच्च
किं प्राशित्रादीनां शेषकार्याणां परिसंख्यां करोति नेति चिंतायामिडोपह्वानदर्शनान्नेति प्राप्ते ब्रूमः॥
घ३ परिसंचैव एव प्राप्तः स्विष्टकृत् पुनः श्रूयमाणः शेषकार्यान्तराणि। इडादिदर्शनं तु वचनान्तरविहि
तत्वादुपपन्नं नान्यस्य शेषकार्यस्यानिवृत्तिं सूचयति।१॥ शंय्विडान्तत्वे विकल्पस्याल्परेषु पत्न्य
नूयाजप्रतिषेधादनर्थकोऽपि स्यात्॥ ज्योतिष्टोमे श्रूयते शंय्वंता प्रायणीया संतिष्ठते न पत्नीः संयाज
यंति इडांतातिथ्या संतिष्ठते नानूयाजान्यजतीति। तत्र संशयः। किं प्रायणीयातिथ्ये शंय्विडांते वा कृ
त्स्नसंस्थे वा न शंय्विडांते एवेति। तत्र शंय्विडांतवचनेन परेष्वंगेषु सर्वेष्वकर्त्तव्येषु पुनः पत्नीसंया
जानुयाजानामकर्त्तव्यत्ववचनं परिसंख्यारूपेणांगान्तराणामकर्त्तव्यताप्रतिषेधेन कर्त्तव्यताविधानार्थं पत्नीसं[illegible]नेव न कुर्यादन्यानि तु कुर्यादेवेति तेन पत्नीसंयाजानुयाजप्रतिषेधेन कृत्स्न
याजानु याडा६ संस्थाविधानाच्छंय्विडांतवचनेन तत्संस्थाविधानाद्द्वयोः संस्थयोर्विकल्पः। नैवं। वाक्यभेदो
हि नन्यायो विकल्पश्चाष्टदोषग्रस्तः। त्रिदोषा परिसंख्या च तस्मात्तत्त्वेकवाक्यतायां शंय्वि
डांते एव प्रायणीयातिथ्ये॥२॥ प्रतिषेधार्थवत्वाद्दोषान्तरस्य परस्तात् प्रतिषेधः स्यात्॥ शंय्विडांतयो
रेव संदेहः प्रकृतौ ह्येशं यू पत्नीसंयाजानां पुरस्तादेकः पश्चादपरस्तथेडश्चापि द्वे। अनुयाजानां
पुरस्तादेका पश्चादपरा। तत्र किं पूर्वाभ्यां शंय्विडाभ्यां तदंततोत्तराभ्यामिति। विशेषाभावादनिय
शंय्विडांत विधेरेवायमर्थेवादः [illegible] पत्नीसं[illegible]जाद्यकरणाल्ल
घवं भवतीति न विध्यंतरं। तस्मान्नियमनं४ या

लौ:५

मे प्राप्ते विधीयते। उत्तराभ्यामेव। कुतः। इदं तावत्सर्वमग्निहुतोत्सर्गवचनवदं। छिद्रं तां गरातिं धानमतो
पेशं योरिडायाश्च प्राचः पदार्थास्ते कर्तव्याः। ये चोत्तराभ्यां शंछिद्राभ्यां प्राचस्ते प्राक्पिशंछिद्राभ्यां सर्व
न्यायित्वमस्तीति कर्तव्यता गम्यते। तस्मादुत्तराभ्यामेवतदंततः। तथा च पत्नीसंयाजानुयाजप्रतिषे
धोर्थवान्भवति। वादमात्रं ह्यनर्थकं। स्यादेवं शंछिद्रंतां गरातिर्यदि विधीयते। अवृत्तयोस्तु संस्था
नं चोपतेशं। छिद्रंतयोः। संतिष्ठतिनाहि संस्थानमुपरमो विधीयते नां गरातिः। तेन प्रवृत्ते प्रायणी
यत्यपेशं। छिद्रंते सत्यौ संतिष्ठते। तामवस्थां प्राप्य ततः परं न प्रवर्तितव्यमुपरंतव्यं। तेन शं। छि
द्रे चैतत्साक्षात्कृते कर्तव्यमवस्थानमिति सर्वाभ्यामेवतदंततः। पत्न्यनुयाजप्रतिषेधस्त्वेकवाक्य
त्वादर्थवादार्थोनुवादइत्युक्तं॥१३॥उपसत्सु यावदुक्तमकर्म स्यात्। ज्योतिष्टोमे संत्युपसदस्ताः
प्रकृत्य श्रूयते अग्रयाज्यास्तादृति। तथा स्रुवेणाघारमाघारयतीति। तत्र संदेहः। किं प्रतिषिद्धप्र
याजादिवर्जमन्यत्सर्वमाकृतं कर्तव्यमुत प्रत्यक्षवचनविहितानाघारादिनापरिसंख्यानादप्र
वृत्तापरत्वाद्धा सर्वमप्रकृतमकर्तव्यमिति। परिसंख्यापक्षस्तु गृह मे धीयवन्निरस्तोपि संनवमा
त्रे लोपन्यस्त इति द्वावेव पक्षौ। तत्र केनापि कारणेनाघारादीनामभावमाशंक्य प्रतिप्रसवं कु
र्वद्विवचनमिदं प्रतिभाति। नाघारादिभ्योन्या माहुतिमोपसदीपुरस्तादृजु कुयाघदन्यां जु
हुयादन्यन्मुखं कुर्यादाघारादयो हि सर्वेष्टीनां मुखं अतः स्रुवेणाघारमाघारयतीति। तेन मति

याज्यास्ता अनन्तं ६ — पर्वयोः कृतयोः कर्तव्यं संस्थानमिति २

५१

राम ४८

छिद्रपूर्वं सर्वार्थमिदं न परिसंख्यामपूर्वं [illegible]तां वा शक्नोति कर्तुं अथवा वादकप्राप्तानुवादमात्र
मिदमस्तु। नन्वानर्थकं स्यात्। अपूर्वतापक्षेऽप्यप्रयाजास्ता अननूयाजास्ता इति वचनद्वयम
नर्थकमेव स्यात्। तद्वरमेकस्यैवानर्थक्यं। तस्मात्प्रति छिद्रवर्जमन्यत्सर्वं कर्त्तव्यं। उच्यते। न ताव
दनावार्शंकाद्यारादीनामस्ति येन प्रतिप्रसवः क्रियेत तस्मादपूर्वतापरमेवैतत्। अप्रयाजाननू
याजवचनं त्वनुवादमात्रमाख्यातानावात्। स्त्रुवाघारवचनं त्वाख्यातसंज्ञावाघेहृस्य प्रवृत्त्या
दितिवक्तव्यमिति संबंधाद्द्विधा पर्कं सदपूर्वतां गमयतीति विशेषः ॥१४॥ अवभृथे बर्हिः प्रतिषे
धात्तेषकर्म स्यात्॥ अवभृथे श्रूयते अप्सु मंतावाऽपत्नागोयजतीति। तथा अपबर्हिषः प्र
याजान्यजति अपबर्हिषावनूयाजौ यजतीति। तत्र किमवभृथे बर्हिःसंज्ञकं चतुर्थप्रया
जं बर्हिःसंज्ञं प्रथममनुयाजं च वर्जयित्वाऽन्यत्सर्वं कर्त्तव्यमुत प्रत्यक्षश्रुतव्यतिरिक्तमन्यत्स
र्वं परिसंख्यानादपूर्वत्वाद्धानकर्त्तव्यमिति संशयः। तत्राऽपत्नागवचनमप्सुमन्तागुणविधानार्थं
नापूर्वतां गमयति। तस्माद्बर्हिर्वर्जमन्यत्सर्वं कर्त्तव्यं। मैवं। लिंगक्रमाभ्यामेवाप्स्वग्ने सधिष्
व अप्सु मे सोमो अब्रवीदिति मंत्रप्राप्तेः प्राप्तेवाऽपत्नागयोरप्सुमत्तासानविधातव्या। नेत्तर्ऽपत्नाग
विध्यर्थमेवं वचनमित्यपूर्वेवभृथः। अपबर्हिषःप्रयाजान्यजतीत्यादिवचनं बर्हिर्व्यतिरिक्तप्र

वं १

न बर्हिः प्रतिषेधार्थं नार्षेयं वृणीत इत्यादेर्निषेधस्य विकल्पापत्तेस्तत्परिहाराय पर्युदासत्वं वदता जैमिनिना शास्त्रेणेदुर्बलेन सामान्यं न बाध्यतेऽप्राप्तत्वान्न वा ध्यत इत्संगीरुतं १२

यार्त्तविधानार्थं ॥ १५ ॥ विरोधिनामेकश्रुतौ नियमः स्याद्ग्रहणस्यार्थवत्त्वाच्छरवच्च कृतितो विशिष्टत्वात् । यत्र चोदकेनानेकेषां प्राप्तानामेकं प्रत्यक्षं श्रूयते । यथा खादिरो यूपो भवतीत्यष्टौ चैवमयः पुरोडाश इत्यादिषु । तत्र किंश्रुतस्य खादिरादेरतिदिष्टस्य च पलाशादेः प्रकृतिवद्विकल्पः । अथवा श्रुतस्यैव नियम इति संशये विकल्पः प्रकृतिवत् । प्रत्यक्षवचनं तु न खादिरादेर्विधायकं प्राप्तत्वात्पलाशादि

50 निवृत्त्यर्थत्वे त्रिदोषापरिसंख्या स्यात् । तस्मादनुवादमात्रमिति यथा चोदकं विकल्पः । नैवं । पर्थे वप्रकृतावर्थादनियतानेकद्रव्यकत्वे प्राप्ते व्रीहि खादिरादिश्रवणं नियमार्थमेवं चोदकेनाप्यनियमे न खादिरादिप्राप्यमाणं प्रत्यक्षवचनेन नियम्यते । तन्नियमाच्चार्थान्नावात्पलाशादेर्निवृत्तिः ॥ १६ ॥

सर्वासां च गुणानामर्थवत्त्वाद्ग्रहणमप्रवृत्तेः स्यात् । अध्यायादावर्थलोपाद्बाधो वर्त्तितः । प्रत्याम्नानस्य तु बाधकत्वं सिद्धवत्स्वेन्वोव्यवहृतमिदानीं तु तदेव चिन्त्यते । किं प्रत्यक्षश्रुतेन श्यामाकादिना प्रत्याम्नानाच्चोदकप्राप्तव्रीह्यादिबाधितुं शक्यमुतो न यतस्तुल्यं बलमिति विकल्पः समुच्चयो वा । तत्र तद्द्वर्जप्राप्तिनिराकरणाच्चोदकेन तावद्व्रीह्याद्यपि प्राप्यते । न च प्राप्ते शास्त्रे केन वि बाधितुं शास्त्रप्रामाण्याविशेषात् । तथा च नार्षेयं वृणीत इति प्रत्यक्षोऽपि [illegible]तिषेधः पक्षे चोदक

राम ५०

प्राप्ते न वरणेन विकल्पत इति वक्ष्यते । न तुल्यत्वादुभयं शब्दलक्षणमिति । न च सत्यपि चोद

प्र२

वस्तुतश्चोदकेन कुशादेरविषयीकरणात् छ्रादेर्ग्रहणमित्यर्थः। ५

प्रां १ कुशाङ्गत्वे व्रीह्यादेरननुष्ठानं। कार्यनिमित्तत्वानुष्ठानं तत्साधनत्वे सति व्रीहीणां को नाम निराकु
र्यात्। तस्माद्विकल्पः समुच्चयो वा। सत्यं यदि पारमार्थिकी चोदकप्राप्तिः स्यान्न त्वेवं। चोदको हि य
द्यपि सर्वपदार्थानुरक्तं यागगतं व्यापारं प्रापयन्नेकैकं न व्यापारे। तास्वर्गत्वेङ्गानि प्रापयति न प्रत्ये
कं तथापि व्रीह्यादिविशेषप्रत्यक्षवचनविरोधमालोच्य तद्युतिरिक्ताङ्गपरत्वेन व्यवस्थाप्यते। नदि
दमुक्तं भाष्यकारेण यदुक्तमथ ग्रहणाद्ग्रहणमिति तदिह सिद्धमिति सिद्धान्तत्वेन स्थापितमित्यर्थः। स
मुच्चयपक्षस्योत्तरं। प्रा[illegible]मविप्रयोजनाभावान्नानुष्ठीयत इति। न ह्यतिदिष्टमपि व्रीह्यादियवैः सि
द्धे यागेनुष्ठातव्यमित्यत्त्विप्रायः। तस्मात्प्रत्यक्षश्रुतं द्रव्यदेवतं चोदकप्राप्तं बाधते॥ १७॥ तथैका
र्थे विकारे प्राकृतस्याप्रवृत्तिः प्रवृत्तौ हि विकल्पः स्यात्। क्वचिच्छूयते औदुंबरो यूपो भवतीति तत्र किं
प्राकृतं खादिरं यूपद्रव्यं प्रवर्तते नेति संशये द्वयोरपि सह नियोजनसंभवादस्ति विरोधे न युक्तो
बाधः। तस्माद्द्वयोरपि यूपयोः समुच्चयः। नैवं। निरपेक्षो हि खादिरश्चोदकेन प्राप्यते निरपेक्ष
श्चौदुंबरतां श्रुत्यौदुंबरता विधीयत इति स्पष्टो विरोधः॥ १८॥ विकल्पेनैव तु नियमः स्यात्स्वपदाद्य
वद्ग्रहणस्य गुणार्थत्वादुभयोश्चमदृष्टत्वानुग्राशास्त्रं यदेतिस्यात्॥ यत्र प्राकृतानां वैकल्पिकाना
२ उपदेशेन। समुच्चये द्वयोरपि बाधः। किंच औदुंबरेनन यूपान्तरं विधीयते किं तर्हि प्राकृतस्यैव यूपस्य खादिर

ववनेः बाधः २

व्रीहीणां नैऋातं चरुं निर्वपेत् कृ[illegible]ष्णानां १

मन्यत महे कल्पिकं गुणांतरसहितं कर्मोत्पत्तिवाक्ये श्रूयते यथा सोमारौद्रं चरुं निर्वपेत् कृष्णानां व्री
हीणामिति तत्र संशयः। किं व्रीहियवयोर्विकल्पः व्रीहिपक्षे च शुक्लकृष्णविधि रुत सर्वदा व्रीहय ए
वेति। तत्र व्रीहिग्रहणस्य शुक्लादिगुणसंबंधार्थत्वेनाविधायकत्वान्न यवानां बाधः। तस्माद्विकल्प इ
5/ ति नैवं। नह्येकेन वाक्येन यागस्योत्पादकप्राप्तव्रीह्युद्देशेन गुणस्य च विधा[illegible] न यवानां बाधः
न संभवति। तस्माद्द्रव्यगुणविशिष्टकर्मविधानादुपदिष्टा व्रीहयो यवान्बाधेरन्॥१५॥ यथाश्रुतीति
चेत्॥ अग्नीषोमीयपशोः श्रूयते यच पिवितुरवत्तीयजमानः पंचावत्तेव वपा कार्येति। तत्र किं चा पं
दि७ वदानं वपायामेवोत हृदयादिष्वंगेषु संकीर्यत इति संशयः वपोद्देशेन विधानाद्वपायामेव स्याद्वा ग
पूर्वेभ्यो भिन्नत्वाच्च प्रासाधिकरणन्यायेन संकरे प्राप्ते विधीयते। वपामुद्दिश्य वोच्चेत यदि पंचाव
नै६ दानता। स्यादेवमवदानं तु पंचसंख्यात्र वोच्यते। न हि वपामुद्दिश्य पंचत्वविशिष्टमवदानं विधीयते। अ
वदानस्य प्राप्तत्वात्। अतो वदानोद्देशेन पंचसंख्याविधानादुद्दिश्यमानस्य च वपया विशेषणासं
भवात्सर्वत्रावदानमुद्दिश्य पंचत्वं विधीयते। वपाग्रहणं तु प्रदर्शनार्थमिति सर्वेषां पंचावदानं। ननु समा
से कदेशमवदानमुद्दिश्यैकदेशांतरं पंचत्वं नत्वंगवत्कथं विधातुं। अतो वपामेवोद्दिश्य पंचसंख्याविशि राम
ष्टमवदानांतरं प्राप्ते तावदावकार्यम धर्युना काशदान [illegible] द्विधीयते वपाग्रहणं चैवमर्थ ५१
वद्भविष्यति। इतरथा वपुत्सानुवादो लक्षणा वा स्यात्। सत्यपि पशुयागतदपूर्वयोरेकत्वे प्यासा

पूर्वत्र दान्मैत्रावरुणादिष्वप्यणवहूपात्सर्वं प्रयुक्तत्वात्पंचावदानस्यनांगेषु संकरो भवति। उच्यते। एका
दशवैपशोरवदानानितानि सानि द्विर्द्विरवद्यतीति। यदेतद्ध्यवदानवचनमिदमत्रसिद्धांतस्य मूलयुक्तिः।
वपामात्रविषये हि पंचावदानेप्रकृतितएव द्विर्हविषोवद्यतीति प्राप्तत्वाद्ध्यवदानवचन मिदमत्रसि
द्धांतस्य मूलयुक्तिः। वपामात्रविषये हि पंचावदानेप्रकृतितएव द्विर्हविषोवद्यतीति प्राप्तत्वाद्ध्यव
दानवचन मनर्थकं स्यात्। सर्वविषये तु पंचावदाने संख्यासंपत्त्येह विषस्यावदाने प्राप्ते द्व्यव
दानविधानमर्थवद्भवति। सकलवचनानर्थक्याद्धूरमेकस्य वपाग्रहणस्योपलक्षणार्थत्वमंगी
कृतं। तस्मात्सर्वविषयं पंचत्वं। तच्चांगेषु द्व्यवदानवचनादुपस्तरणविनध्याभिघारणविरुध्यावा
संपद्यते। तस्मादंगेष्वपि पंचावदानं॥२०॥ ॥इति शास्त्रदीपिकायां दशमस्याध्यायस्य सप्तमः पा म
दः॥ ॥ प्रतिषेधः प्रदेशेनारभ्य विधाने च प्राप्तप्रतिषिद्धत्वाद्विकल्पः स्यात्। महापितृयज्ञे दार्श
पौर्णमासिके विध्यंते प्रदिष्टे श्रूयते। नार्षेयं वृणीते न होतारमिति। तथानारभ्य श्रूयते यजतिषु ये
यजामहं करोति नानुयाजेष्विति। तत्र विचार्यते किं महापितृयज्ञे वरणस्य प्र
दिष्टस्य तत्प्रतिषेधस्य च विकल्पः तथानुयाजेषु येयजामहतत्प्रतिषेधयोरुत नियोगतो व
र्जनमेवेति। तदर्थमिदं चिंत्यते। नार्षेयं नानुयाजेष्विति किमयं प्रतिषेध उत पर्युदास इति। तत्र

=एकार्थास्तु विकल्पेरन्निति न्यायात्= १

श्रुत्यर्थलाभाय प्रतिषेधोऽन्यथा पुनः। पदद्वयमपि ह्यन्यपरत्वाल्लक्षणां भजेत्। प्रतिषेधप
क्षे हि चोदकप्राप्तमार्षेयवरणं श्रुत्यैवानूद्यते श्रुत्यैव च प्रतिषिध्यतेऽनारभ्यवादप्राप्तस्त्वये
यजामहः। पर्युदासपक्षे पुनर्नञ्याजशब्दाभ्यां याजान्तराणि न गृह्णातीत्यां च वरण
व्यतिरिक्तचोदकप्राप्तं याजान्तराणि लक्षणया प्रतिपाद्येरन्। न च श्रुतिसंभवे लक्षणा युक्ता।
किं चानुयाजशब्दसंबंधे न नञ्समासप्रसंगः नित्यो ह्यस्य सुबन्तसंबंधे समास इति ब्रुवन्वा
र्तिककारो वाव वचनानर्थक्यं मन्यते। एवं हि वदन्वाक्यसमासयोर्भिन्नार्थतां मेने। सति ह्येकार्थ्ये
समासनियमाद्वाक्यं निवर्तेत तन्मा निवर्त्तिष्टेति कृतं व्यवाचनमिति तदानर्थक्यं न ब्रूयात्। आ
नर्थक्यं वचनानुनास्त्येकार्थ्यमिति गम्यते। ततो नानुयाजेष्विति समासगम्यः पर्युदासः स्वदे
वलभ्यत इति तद्विवक्षायां नित्यः समासः स्यात्। असति तु समासे नानुयाजेष्वित्याख्यात
संबंधी नञ्प्रतिषेधार्थ एव ज्ञायते। अतश्च प्रदेशानारभ्यवादाभ्यां विहितत्वादाभ्यां च वचना
भ्यां प्रतिषिद्धत्वाद्वरणये यजामहयोर्विकल्पः। ननु सामान्यविषयस्य विधेर्विशेषविषय राम
स्य च प्रतिषेधस्यातुल्यबलत्वाद्युक्तो बाधो न विकल्पः। तथानुमानिकस्य चोदकस्य प्रत्यक्ष ५२
स्य च सुतरामयुक्त इति चेत्। मैवं। तन्नाम प्रत्यक्षं विशेषशास्त्रं सामान्यस्यानुमानिकस्य च

बाधनेऽसमर्थं यत्तन्निरपेक्षमात्मानं लभते। यथा शरपदशास्त्रे कुशाहवनीययोः। न हि शरविधिः २
कुशप्राप्तिमपेक्षते तत्कार्यमात्रापेक्षत्वात्। पदविधिः प्रतिहोममा
त्रापेक्षो नाहवनीयप्राप्तिमपेक्षते। तेन प्रागेव कुशाहवनीयप्राप्तेः प्रत्यक्षेण विशेषशास्त्रेण
शरविहिते शरपदे पश्चात्सामान्यद्वारा लक्षणया प्राप्यमाणयोः प्राप्तिं निवारयतीति युक्तो
बाधः। अत्र तु प्राप्त्यपेक्षत्वादवश्यं प्रतिषेधशास्त्रेणैव प्रतिषेध्ययोर्वरणयेयजामहयोर्महापि
त्रयज्ञेऽनुयाजेषु च प्राप्तिः प्रतीक्षितव्या। प्राप्तिश्च निर्दोषशास्त्रकारितत्वादशक्या मिथ्याकर्त्तुं।
अ॰१ तस्माद्विकल्प इति प्राप्ते ब्रूमः। यत एव विकल्पोऽयं प्रतिषेधे प्रसज्यते। अतस्तत्परिहाराय पर्युदा
साश्रयो वरं। नित्यवत्कृतयोर्विधिप्रतिषेधयोः पक्षे प्रयुक्तता विद्यमानमिथ्यात्वकल्पनाद
त्यन्तायुक्तो विकल्प इति वरं लक्षणया विपर्युदासाश्रयणं। न चानूयाजशब्दसंबंधे नञ्स
मासापत्तिः। विज्ञाबाध्ययनात्पाणिनेः कात्यायनीयं तु वावचनानर्थक्यं न्यायविरोधादना
वृ॰३ दर्त्तव्यं। अस्ति हि समासवाक्ययोरेकार्थ्यं। य एव हि राजपुरुष इति वृत्तेरर्थो राजविशिष्टः पु
रुषः स एव राज्ञः पुरुष इति वाक्यस्यापि। विशेषस्त्वेतावान्। वृत्तावभिधानद्वयमप्यनन्याक्षिप्त
स्वार्थसमर्पकं विशिष्टं प्रतिपादयति। वाक्ये त्वर्थान्तराक्षेपं सहते यथा आढ्यस्य राज्ञः पुरुष इति

४= इदं तु प्रौढिमात्रमित्य। वस्तुतस्तु पकार्थत्वे न्यायप्राप्तत्वाद्विभाषायां वा वचनमन
र्थकं न्यायप्राप्तत्वादनुवादमात्रमित्यर्थः। तथा च नान्याय्यं तद्वानर्थक्यमिति ध्येयं=४

राजपदमध्याक्षेपमनुनवत्सुरूपं विशिनष्टि। न चैतावतार्थभेदः। प्रतिपाद्यभेदात्। यदि चैताव
ताभेदे न समासो वाक्यस्यानिवर्तकत्वंगी क्रियते ततो विभाषावचनात्सा विहिते नोपकुंभादिस
मासेनापि वाक्यं न निवर्त्यतोपपदसमासेन च कुंभकारादिना। न चैवमिष्टं। तस्मादवश्यादेयं वि
भाषावचनमित्यन्याय्यं तदानर्थक्यं। तस्मादसमासेपि विकल्पपरिहीर्षया युक्तं पर्युदा
साश्रयणं। एवं च प्रदेशानारभ्यवादयोरेवायं वाक्यशेषः अकृतिवत्सु यदार्षेयवरणव्य
तिरिक्तं पित्र्यज्ञे। अन्यत्राज्ञव्यतिरिक्तेषु यज्ञेषु येयजा... महं कुर्यादिति। ततश्च विधेरंगां
दर्शपूर्ण तरयज्ञांतरविषयत्वादविहितमेव वरणं स नुयाजेषु च येयजामहः। तस्मान्न विकल्पोऽन
मासयोः नुष्ठानेन वा। नित्यश्च विधेरंगांतरयज्ञांतरविषयत्वाद...मेव वरणमनुयाजेषु सोयं प्रतिषि
द्धनिबंधनः प्राकृतांगबाधः। शरैः कुशानां प्रत्याम्नानात्त्वचं यं दितादिषु लवेदीनामर्थलोपादिति
त्रेधा बाधो वेदितव्यः॥१॥ अपूर्वे वार्थवादः स्यात्॥ दर्शपूर्णमासयोराज्यभागावग्नीषोमाभ्यां ना ५
यजतीत्येवं विधायश्रूयते नो न पशौ करोति न सोमे इति। किमयं प्रतिषेधः पर्युदासो वार्थवादो वाऽ
वेति संशयः। नत्रासमस्तत्वात्प्रतिषेधः। विकल्पभयाद्वा पूर्ववत्पर्युदासः। न नु सोमस्योपदेशाति
देशाभ्यामाज्यभागप्राप्त्यभावादनुवादनयमप्ययुक्तं। सत्यं साक्षात्सोमे नाज्यभागौ स्तः दीक्षणीयादिषु रेता ५३

त्वाज्यभागाभ्यां सोमस्यास्ति संबंधः स प्रतिषिध्यते। तदनेन प्रकारेण सोमांगेषु दीक्षणीयादिष्वा
ज्यभागप्रतिषेधः पर्युदासो वेति प्राप्ते ब्रूमः। यद्युपदेशेनातिदेशेन वाज्यभागौ सोमे प्राप्नुयातां
ततो निषेधः स्यात्। यदि च सोमासोमसाधारणमाज्यभागविधानमभविष्यत्ततोऽसोम इति पर्यु
दासो वा कल्प्यः स्यात्। न त्वेवमस्ति। न च दीक्षणीयादिषु प्रतिषेधस्तथा सति न सोम इत्यनेनैवा
ग्नीषोमीयेऽपि पशौ प्रतिषेधसिद्धेस्तत्रैव तद्विकारेषु निरूढादिपशुष्वपि प्राप्तत्वान्न पशाविति
प्रतिषेधोऽनर्थकः स्यात्। सोमशब्दस्य चैवं लक्षणा स्यात्। न च वाजपेयस्यैव यूपे नागद्वारकः सोमा
ज्यभागसंबंधो निर्दिश्यते। षष्ठ्यादिसंबंधमात्रमभिधत्ते सप्तमी त्वाधाराधेयभावमेव। न चांगांग
त्वेनाधाराधेयभावः संभवति। तस्मादंगांगित्वेन निर्देशो यं स चाप्राप्त इति न प्रतिषेधपर्युदासा
वयुक्तौ। तस्मान्न पशाविति सर्वमर्थवादो यथा सोमस्य नाज्यभागौ एवं पशावपीति। अथ न प
शाविति किमयं प्रतिषेधः पर्युदासो वा। विकल्पपरिहाराय पर्युदास इति केचित् तदयुक्तं। अनंत
प्र ३ रं दर्शस्याज्यभागांगविधेः केवलदर्शपूर्णमासविषयत्वेन पश्वपशुसाधारण्याभावात्। न च पाशु =
कस्य प्रकृतिवद्भावस्यायं वाक्यशेषः तस्यैव सन्निधानात्तद्बोधकत्वे चन सोम इत्यर्थवादो नावकल्प त्रे र
ते। न ह्येवं संभवति यथा सोमस्याज्यभागव्यतिरिक्तमंगमस्ति कं कर्त्तव्यं तथा पशोरपीति। सो ६२ पि

४ = तौ न पशावित्येतदनंतरं प्रथवनस्य प ४ पं-
आज्यभागरूपांगविधेः अग्नीषोमाभ्यामित्यस्य = ४

१ = नोत दिक्षे इति वाक्ये व्याख्यावादः न प्राप्तिसापेक्षः = १

मस्यापूर्वत्वादेष्टिकांगानावात् । संत्ववनित्यं च । यथा सोमस्याज्यन्नागोऽनैकत्वे ऽपो न तथा पशो

विधौ २ रपीति । तस्मात् प्रतिषेधः । तन्न पशावाज्यभागयोर्विकल्पः ॥२॥ शिष्ट्वा तु प्रतिषेधः स्यात् ॥ सा

मान्यविषयैर्विशेषविषयो नञ्पर्युदासरूपेण विधिरेव वाक्यशेष इत्युक्तं अप्राप्तविषय

स्तु नञर्थवाद इति । अथ क्वायं प्रतिषेधो भवतीति तत उच्यते । यत्रैकमर्थं शिष्ट्वा तद्विषय एव

नकारः श्रूयते यथातिरात्रे षोडशिनं गृह्णातीति नातिरात्र इति । तत्र प्रतिषेधः पर्युदासार्थवादा

संभवात् ग्रहणाग्रहणयोर्विकल्पः । प्रतिषेधार्थबलाद्याकरणेऽपि क्रतुसिद्धिरस्तीति क

ल्प्यते । विध्यर्थबलाय वानुष्ठाने फलभूयस्त्वमिति तु नयोरुपपत्तिः ॥३॥ न चेदन्यं कल्पयेत्प्रक्

तावर्थवादः स्यादानर्थक्यात्परसामर्थ्याच्च ॥ अस्येदानीमपवादः क्रियते । शिष्ट्वापि श्रूयमा

णो नञ् क्वचित्प्रतिषेधार्थमपहायार्थवादार्थो भवति यत्र विध्यंतरेणैकवाक्यत्वं तथा ह्यग्नि

होत्रे जर्त्तिलयवाग्वा वा जुहुयाद्गवेधुकयवाग्वा वेत्युक्त्वाऽनाहुतिर्वै जर्त्तिलाश्च गवेधुका

श्चेत्युक्तं । ततः पुनः पयसाग्निहोत्रं जुहुयादिति श्रुतं । तत्र संशयः । किं जर्त्तिलगवेधुकानामना

हुतिवादः प्रतिषेधः उत पयोहोमस्यार्थवाद इति । तत्र पूर्वेण न्यायेन प्रतिषेधार्थता जर्त्तिलगवे राम

धुकास्तावद्धि स्पष्टेन लिङ्प्रत्ययेन विहितास्तेषामयमनाहुतिवादः प्रतिषेधः । पयो विधिश्च वा ५४

आपदेवीयमीमांसान्यायप्रकाशः ४

वत्तां तरस्मिन्निति प्राप्ते निषिध्यते। यद्यपि जर्तिलगवेधुकाविधिस्तथापि अनाहुतिवादो नैव प्रतिषे
धो नर्थकत्वात्। विकल्पार्थो न हि प्रतिषेधः स चेह विकल्पः पयोविधिनैव जर्तिलगवेधुकानां सि
द्ध इति व्यर्थः प्रतिषेधः। परेणाच विधिनास्य समस्तस्यैकार्थत्वमर्थवादतया संभवतीति न युक्तो
वाक्यभेदः। तस्मादनाहुतिवादस्तावज्जर्तिलादिनिंदाद्वारेण पयसः स्तुत्यर्थः। पदाचैवं तदा
जर्तिलादिविधिरपि तन्निंदाद्वारेण पयसः प्रशस्ततरत्वं ज्ञापयन्नर्थवाद एव न विधिः। एकवा
क्यत्वसंभवे ह्यनेकादृष्टानुबंधि वाक्यभेदकल्पनमन्याय्यं। तस्मात्पयो मात्रं विधीयते अन्यस्तु
सर्वोर्थवादः।४। पूर्वेद्युस्तुल्यकालत्वात्॥ आधाने श्रूयते होतव्यमग्निहोत्रं न होतव्यमिति मीमां
संते ब्रह्मवादिनः यद्यजुषा जुहुयादयथापूर्वमाहुती जुहुयाद्यन्न जुहुयादग्निः परा[illegible]ते तूष्णी प ६
मेव होतव्यमग्निहोत्रमिति। तथा चातुर्मास्येषु त्र्यंबकान्निधि हृत्य श्रूयते अभिघार्या अनभि
घार्या इति मीमांसंते यदभिघारयेत् रुद्रायास्ये पशूनभिदध्यात् यन्नाभिघारयेन्न रुद्रायास्ये
पशूनभिदध्यादथो खल्वाहुरभिघार्या एवेति। तत्र संशयः। किं होमाभिघारणयोर्विकल्प
उतानुष्ठानमेवेति। तत्र होमाभिघारणयोर्विकल्प उतानुष्ठानमेवेति। तत्र होमाभिघारण
योर्विधेयत्वमविवादमतो होतव्यमभिघार्या इति च विध्यर्थमेव न जर्तिलन्यायेनावदन्या।

र्थः। एवं च न होतव्यं नाग्निघार्या इति च प्रतिषेधार्थमेव भवति न मीमांसाविशेषणं। न ह्येकपक्षा-
मीर वलंबिनी मीमांसा संभवतीति। तस्माद्धोतव्यमिति विधेर्न होतव्यमिति निषेधाद्विकल्पः। सति च वि-
कल्पेन्यतरपक्षपरिग्रहाय प्रयोगदशायां मीमांसा संभवतीति तदग्निघारणानुवादो मीमांसाशब्दः
। अं ते तूष्णीं होतव्यमिति तूष्णीभावगुणविधानार्थं वचनं। अपि च रुद्रायास्य पशुनाग्निं दध्यादि-
55 त्यग्निघारणनिंदा कथं न ह्यविधेः शेषो भवेत्। तस्मान्निषेधशेषत्वाय मंते नाग्निघार्या इति वच- 55
नमनुवाद इति प्राप्ते ब्रूमः। सत्यं होमाग्निघारणे विधेये तथाप्युपक्रमे श्रवणं न विध्यर्थमुभ-
सा७ योरपि होमाहोमयोर्मीमांसंबंधाक्रमादंते त्वनन्यपरं श्रवणं विध्यर्थं तदर्थवादोयं। निंदा-
त्वच पि च पशुस्तुतये स्तुत्यापनार्थैवा एवमिदमग्निघारणं प्रशस्तं यत्समस्तमपि दोषमनादृत्य
कर्तव्यमिति। तस्मान्न विकल्पो नियत एव होमाग्निघारणे॥५॥ उपवादश्च तद्वत्॥ अग्न्या-
धेये वारवंत्यादि सामगानं विधाय श्रूयते न ब्राह्मणा सामानि गायेदिति। तत्र संशयः। किम-
यं प्रतिषेधो नुवादो नित्यं सामगानमुत प्रतिषेधार्थमेवेदं विकल्पः सामगानस्येति। तत्र ब्रा-
ह्मणो गानप्राप्त्यभावादनुवादोयं निषेधस्तेन नित्यं गानं। नैवं। अनुवादमात्रस्यानर्थकत्वात्। राम
तस्माद्गाननिषेधोयं। ब्राह्मणशब्दस्तु ब्राह्मणपरोनुवादः॥६॥ दीक्षितस्य दानहोमपाकप्रतिषे- ५५

नित्यानुवादः ३ [illegible]कर्तव्यं ३

धोऽविशेषात्तस्माद्दानहोमपाकप्रतिषेध

वार्त्तिकमतमुपसंहरति तस्मादिति। सूत्रभाष्यकारौ व्याचष्टे तथापीति। एवं प्रतिषेधपक्षे रसरत्नाप्यकर्तुदुक्तदोषो द्वारूलूत्यं

धःस्यात्। ज्योतिष्टोमातिदिष्टानां च प्रतिषेधः तातिदिष्टानां पुरुषार्थानां च अथवा पुरुषार्थानामेवाग्निहोत्रा× दीक्षितो न ददाति न जुहोति न पचतीति तत्र विचारः किमयं सर्वेषामेव पुरुषार्थानां क्रत्वर्थानां चोपदिष्टा×दीनामिति। तत्राविशेषात्सर्वेषां। आहत्यविहितानां तु यत्र हे जुहोतीत्यादीनां बलवत्त्वान्न ह्यर्द्धमातिदेशिकानां चतुरवत्तहोमादीनामग्निहोत्रादीनामग्निहोत्रादीनां च बाध इति प्राप्ते ब्रूमः। विकल्पप्रसंगान्न क्रत्वर्थप्रतिषेधः। तस्मात्पुरुषार्थानामेव। तत्रापि प्रतिषेधपक्षे विकल्पदोषः स्यादेव। तस्मात्पर्युदासोऽग्निहोत्रादिविधिःशेषोऽयमदीक्षितोऽग्निहोत्रादिकुर्यादिति। न त्वेतद्युक्तमसन्निहितत्वादग्निहोत्रविधेः। तस्मात्प्रतिषेध एवायं। न च विकल्पप्रसक्तिरेकार्थाभावात्। यद्युभावपि विधिप्रतिषेधौ पुरुषार्थौ क्रत्वर्थौ वाऽन्विष्येतां ततो विकल्पिष्येयातां। पुरुषार्थतया तु विहितानामग्निहोत्रादीनां क्रतुमध्येऽपि प्राप्तानां प्रतिषेधः क्रत्वर्थतया क्रियते स्त्र्युपगमादिप्रतिषेधवत्। अतः क्रतुमनुतिष्ठता वर्जनीयान्यग्निहोत्रादीनि रवंतीति नास्ति विकल्पप्रसंगः। यदा च प्रतिषेधपक्षेऽप्यविकल्पस्तदा क्रत्वर्थलिप्सया प्रकरणानुग्रहेच्छया च प्रतिषेधत्वमेवान्याय्यं। पर्युदासपक्षे हि न शब्ददीक्षितद्वावुभावपि दीक्षितव्यतिरिक्तपुरुषलक्षणार्थौ स्यातां। तस्मात्प्रतिषेधः। तथापि विकल्पानावकाशः। ननु सत्र पाष्युरुन्मतेन न ओदीक्षितपदसंबन्धात्पर्युदासस्तथ्यते अदीक्षितोऽग्निहोत्रं जुहुयादिति। न च तादृशः चोदकशेषवचनोपादनेनापादयितुं शक्यः। ... दीक्षणीयादिकर्यादिति नेवं संभवति दीक्षितादीक्षितसाधारण्याऽ[illegible]प्राप्तानां चोदकस्येसाशंकोनन्विति नमयानओदीक्षितशब्दान्वये न पर्यु

दासआपाद्यतेकिंतुधात्वन्व … येन अहोमं प्रकृतिवदिति प्रजापतिव्रतेषु अनीक्षणं कुर्यादिति वदिति समाधत्ते नेनेव
मिति। स्वत्र भाष्यकृत्संमतः प्राकृतहोमादिपर्युदा … सः ऊनगुणेनापाद्यतेनसंमतो नाग्निहोत्रादिपर्युदासः केन
दोषेण नेष्यत इत्याशंक्य … मिसननेन स्यादेव … × त ८ × … प्रकरणागतेनेन सन्निहितशेष
त्फलतः पर्युदासत्वं भवतीति मत्वा स्त्रत्र भाष्यकाराभ्यां पर्युदासत्वमुक्तं। यदि च पर्युदासः स्यात्तदा व
रं क्रत्वर्थानामेव होमादीनां पर्युदासः। यद्यपि प्रत्यक्षेण विशेषरूपेण चोपदिष्टानां ग्रहैर्जुहोती
त्येवमादीनामशक्यः पर्युदासस्तथापि सामान्यतोतिदेशेन प्राप्यमाणानां चतुरवत्तहोमनारिष्ट
होमानामार्षेयवरणवत्पर्युदासः स्यात्। ननु दीक्षितस्यैव विधीयं तदिति कथं तेषु दीक्षितस्य पर्यु
दासो विधीयंत इति कथं तेषु दीक्षितस्य पर्युदासो विधीयते। नैवं। नदीक्षितशब्दे नसमुहनञः प
र्युदासत्वमदीक्षित इति कथं तद्धिददात्यादि … दीक्षित इति शब्दे दीक्षितो दानहोमव्यतिरिक्तानि
प्राकृतान्यंगानि कुर्यादिति। एवमतिदेशपर्युदासेन प्रकरणागतानामेव मायणी यदि विधीनां दी
क्षोत्तरकालभाविनां शेषो नवन्नयं पर्युदासो नासन्निहिताग्निहोत्रादिशेषतामवलंबते। तस्माल्लु
क्षणोपरिहाराय पर्युदासपक्षं परित्यज्य पुरुषार्थतत्त्वया प्रतिषेधमेवांगीकृत्य क्रत्वर्थप्रतिषेधे ८५
विकल्पप्रसंगात्पुरुषार्थानामेव प्रतिषेधः क्रत्वंगत्वापि विधीयतां इत्येतदेव समंजसं।।९।। अवि
शेषेण यत्त्वास्त्रमन्यायत्वाद्विकल्पस्यात त्संदिग्धमाराद्विशेषशिष्टं स्यात्।। नत्र प्रसंगं परिसमाप्या
धुना प्राप्तबाधप्रसंगात्सामान्यविशेषबाधं चिंतयति। यन्मादाहवनीये जुहोतीति सामान्यविहि राम
तस्याहवनीयस्य पदे जुहोति वर्त्मनि जुहोति गार्हपत्ये पत्नीसंयाजान्जुहोतीति विशेषविहितैः ५६
नन्वेवं तर्ह्यस्तु अतिदिष्टहोमादि … दंतापन्तोरवासोनेष्यते … सर्वापसादु
इत्यादपीस्याहतस्मादिति॥

पदादिभिः किं विकल्पोऽथ बाध इति संदेहः। यदि सामान्यविशेषयोस्तुल्यबलत्वं ततो विकल्पः।
विशेषबलीयस्त्वे तु बाधः। तत्र सामान्यस्यापि लब्धत्वात्प्रत्यक्षेण विशेषवत्। नास्ति लिंगादि
वद्वा [illegible] पि बाधोऽतिदेशेवत्। लिंगादिकल्प्यस्य हि शास्त्रस्य शीघ्रशास्त्रेण कल्पनानिरोधाद्यु
त४ क्तो बाधः। यथातिदेशस्यानुमानिकत्वात्प्रत्यक्षेण शास्त्रदिष्टशास्त्रेण विरोधे सति न हि दूषयं परिहृ
त्य विषयान्तरपरिकल्पना युक्तः। कुशानां बाधः। सामान्यशास्त्रं तुल्यं प्रत्यक्षश्रुतं च विशेषशा न्य४
स्त्रवदिति तुल्यबलत्वाद्विकल्प एव युक्त इति प्राप्ते ब्रूमः। प्राप्तिः सामान्यशिष्टस्य विशेषलक्ष
णावशात्। श्रुत्या विशेषशिष्टस्य तस्मादस्ति बलाबलं। पत्नीसंयाजादिषु हि होमविशेषेषु हो
मसामान्ये श्रुतस्याहवनीयस्य [illegible] लक्षणया प्राप्तिः। गार्हपत्यादि तु श्रुत्येव होमवि
शेषे विधीयते। तेनास्मिन्विशेषे श्रुत्या शीघ्रप्राप्तं गार्हपत्यादिकं लक्षणया मंदं प्राप्तमाहव
नीयं निरुणद्धीति बाधः॥८॥ अप्रकरणे तु यच्छास्त्रं विशेषे श्रूयमाणं तद्विकृतमाज्यभागव
त्या कृतप्रतिषेधार्थं। सप्तदश सामिधेनीरनुब्रूयादित्यनारभ्य विहितं साप्तदश्यं प्रकृतौ पांच
दश्येन बाधितं विकृत्यर्थमिति स्थितं। विकृतिष्वपि कासु चित्सु मित्रविंदाधरकत्यादिषु
प्रकरणे साप्तदश्यं श्रुतं। तदिदं प्राकरणिकं साप्तदशसामिधेनीवचनं किमाज्यभागवि

धिवदसर्वतापरमुतोपसंहारार्थमितिसंदेहे। कृतोपकाराः प्रकृतौ सामिधेन्यो नितिसा
धिनामविधिवदसर्वतापरमुतोपसंहारार्थमितिसंदेहे यतस्ततः। तास्वेव निराकांक्षा ने
ष्ठंति प्राकृतान्वयं। सामदश्यं त्वनारभ्यवादप्राप्तमनूद्यते। सामिधेन्यस्त्वचोद्यं तेतासि
न्वा सर्वतास्फुटा। भवेदेवमसर्वत्वं सामिधेनीविधिर्यदि। सामदश्यविधिस्त्वेषः तस्मान्नास
ता भवेत्। सामदश्यविधौ किमित्यसर्वता न भवति। नैव सामिधेनीभिः संबंधः तासां च चो
दकप्राप्तेर्न चोदकलोपः संभवति। चोदकलोपे चासर्वत्वमिति न सामदश्यविधावसर्वत्वं। किं
च सामदश्यं त्वनारभ्यवादेन सामिधेनीसंबंधितया श्रुतं यावत्तद्बलेन क्रत्वंगतां नैव कल्पयति
तावत् सर्वकरणिकैर्वचनैरध्वरकल्प्यादिसंबंधे कृते क्षीणार्थापत्तिर्न कर्मांतरसंबंधं कल्पयति। ते
न सामदश्योपसंहारार्थानि प्राकरणिकानि वचनानीति नासर्वत्वं॥९॥ मंत्रे स्ववाक्यशेषत्वं गुणो
पदेशात् स्यात्॥ अनारभ्य श्रूयते स्वाहाकारेण वा वषट्कारेण वा देवेभ्यो हविः प्रदीयत इति। के
षुचिद्दर्विहोमेषु पुनः स्वाहाकारः पठ्यते। पृथिव्यै स्वाहांतरिक्षाय स्वाहेति। तदिदमनारभ्य राम
वादप्राप्तस्य स्वाहाकारस्य विशेषेषु पुनः श्रवणं सामदश्यवदुपसंहारार्थमिति मन्वानस्योत्त ५७
रं। पृथिव्यादिशब्दास्तावन्मात्रवर्णिकदेवताविधानार्थाः स्वाहाकारपाठस्तु वषट्कारवैकल्पि

कत्वे नानियत ग्रामस्याहाकारस्यानियमार्थो नोपसंहारार्थः तस्माद्धोमांतरेऽपि नास्ति स्वाहा
कारस्य बाधः ॥१०॥ अग्न्यतिग्राह्यस्य विकृतावुपदेशादप्रवृत्तिः स्यात्। अग्निरनारभ्यवाद
विहितः स वाक्येन प्रकृतौ विकृतिषु च कासुचिद्विनियुज्यते। अथातोऽग्निमग्निष्टोमेनानुयजन्
ति तमुक्थ्येन तमतिरात्रेण तं त्रिरात्रेणेत्येवमाद्याद्वादशरात्रादनुक्रांतं। सोमे येऽग्नियासु विकृषु
वाक्येन नोपदिष्टो यथा षोडशि वाजपेयेष्वतत्र किं चोदकप्राप्त्या कर्त्तव्यो नेति संशयः। तथा ६
तिग्राह्याणां नाम ग्रहाः प्रकृतौ श्रुताः विकृतिष्वपि कासुचिदुपदिष्टाः उक्थ्ये गृह्णीयात्पृष्ठ्ये गृ
ह्णीयाद्विश्वजिति गृह्णीतव्या इतीतरेऽपि विकृत्यंतरेष्वग्राह्या नेति संशयः। तत्र। चोदकेनाग्न्यति
ग्राह्यं विकृतौ नप्राप्त दिश्यते। कासुचित्तु वचनं तस्य तथाहि स्यादनर्थकं। तस्मात्तदर्थवत्त्वाय प्र
देशो नेति कल्प्यते। तेन यत्रोपदेशोऽस्य तत्रैवान्यत्र न क्रिया। उच्यते। अगतिरवदस्यापि प्राप्ति
श्चोदकतो ध्रुवा। चोदकार्थस्य कृत्स्नत्वात्कासुचित्तु वचनं पुनः। सामान्यविध्यसिध्यर्थं तेनोपदे
शं निवारयेत्। कोऽर्थः सामान्यविध्येऽनुगुणकामप्रवर्त्तनं। यासु विकृतिषु विधीयते तासु प्रकृ
तौ च समानं विधानं भवति विकृत्यंतरेषु तु चोदकतः प्राप्तिरिति न प्रकृतितुल्यं विधानं।
समानविधानत्वे च प्रयोजनमग्न्याश्रितानां गुणकामानां श्येनचितं चि न्वीत स्वर्गकाम

इत्यादीनां तास्वपि विकृतिषु प्रवृत्तिः। गुणकामा हि प्रकृतमग्निमाश्रयन्ति। प्रकृत आग्निमाश्रयन्ति। प्रकृ
तश्चाग्निः प्रकृतिविकृतिसाधारण इति तथा च तस्याश्रयत्वाद्विकृतिष्वपि गुणकामप्रवृत्तिः। या सु
विधिर्नास्ति तासु तु न गुणकामाः प्रवर्त्तेरन् निवृत्तिर्वा कर्मभेदादिति न्यायात्। तदेवं गुणकामप्रवृत्त्यर्थं
विकृतिषु कासुचिल्लवणमिति न तद्बलेनातिदेशाभावः शक्यते कल्पयितुं। तस्मादस्त्यतिदेशः। अत्र
केचिदाहुः। अनारभ्याधीतोऽग्निः प्राकरणिकोऽनरवेदिविरोधात्प्रकृतौ न लक्ष्यते निवेशं। अप्राकृतश्च
न विकृतिष्वतिदिश्यते। तेनोपदेशेनैवास्य विकृतिषु प्राप्तिरित्यनुपदेशात् षोडशिवाजपेययोर्नाग्नि
श्चेतव्य इति। तदयुक्तं। अग्निष्टोमवाक्येन प्रकृतावपि विधानात्। ननु विकृत्यग्निष्टोमाभिप्रायं तद्भवि
ष्यति प्रकृतौ प्राकरणिकोऽनर वेदिविरोधात्। न प्रकरणेन वाक्यसंकोचो युक्तः। किंच प्रकृतेरेवाग्नि
ष्टोमत्वमनन्यापेक्षं विकृतीनां त्वतिदेशापेक्षमिति प्रकृतिरेवानेनाभिधीयते। न चात्र सामिदश्य
स्य हि सामिधेनीमात्रसंबंधो वाक्येनावगम्यते क्रतुसंबंधः कल्पयितव्यः पांचदश्यस्य तु प्रकरणेन
संबंधः कृत इति युक्तं बलाबलं। अग्निष्टोमशब्दस्तु क्रतुमेवाभिधत्त इति न तत्संबंधो वाक्यकृत इति
न प्रकरणेन बाधमर्हति। तस्मादस्ति प्रकृतावग्निरिति विकृतिष्वप्यतिदिश्यते। तत्र सौपस्त्कृषु — राम
सारस्वतेषु च सत्रेषु शस्यतां कामम्। अग्निर्न चीयतां षोडशिवाजपेययोस्तु चेतव्यः॥१२॥ उत्पत्तिता — ५८
चयनं सर्वक्रतुस्थानुष्ठानस्य
न्यायः। सामिदस्य ८ — त्वाभावाद्दशानोते। २
शान्यापरासु सा युक्तिर्विधिचोदेशिन्याभावाद्दशमेनोते। १

दर्थाच्चतुरवत्तं प्रधानस्य होमसंयोगादधिकमाज्यमनुत्पत्तत्वाल्लोकवदुत्पत्तेर्गुणभूतत्वात्। दर्श
पूर्णमासयोरुपस्तरणाभिघारणे हविर्विशेषौ वर्तेते चत्राभिघारयतीति विधायप्रकृते यते चतुरवत्तं जुहोतीति।
तत्र संशयः। किं चतुरवत्तहोमे हविष एव चतुरवदानमुपस्तरणाभिघारणे त्वधिके द्व्यवदानं च
पक्षान्तरं। उतोपस्तरणाभिघारणाभ्यां सह चतुरवत्तं हविषो नित्यं द्विरेवावदानमिति। तत्र द्वि
तीयासंयोगाच्चतुः खण्डनसंस्कृतं। होतव्यं हविस्तस्माद्धोतव्यात् खण्डनं चतुः। चतुरवत्तमिति द्वि
तीयानिर्देशाद्धोतव्यमेव चतुरवत्तं कर्तव्यं हविश्च होतव्यं नान्यं। तस्माद्धविष एव चतुरवदा
नमुपस्तरणादि त्वधिकं। न च तेनाधिकेन होमे चतुरवत्तविघातः। तस्याहोतव्यत्वात्। द्व्यव
दान चतुरवदानयोर्विकल्प इति प्राप्ते ब्रूमः। चतुःसंख्यावदानस्याहोमांगं बा
धते यदि। तत एवं न केवलात्तु यथाप्राप्तानुकीर्त्यते। चतुरवत्तं जुहोतीति नात्र चतुःसंख्यावि
शिष्टमवदानं होमानुवादेन विधीयते होमस्याग्नेयादिवाक्येष्वप्राप्तत्वेनानुवादासंभवात्। न
च चतुरवत्तविशिष्टहोमविधिर्गौरवात्। न चाविहितस्यांगत्वमतो न चतुःसंख्या होमांगं। का
तर्हि वचनव्यक्तिः। यच्चतुरवत्तमिममुपस्तरणादिवाक्यकल्पितचतुरवत्तानुवादेन तत्संस्का

उपस्तरणं च पांसुयाजेष्वाज्यस्याशीर्भ्याहतस्य चेति। स्रुच्यसंसर्गेणादृष्टार्थमुप
स्तरणादु पांसुयाजेन संभवतीति भावः। ९ भिघारणा २

रनयाजुहोतिनास्यागदेवतोद्देशाद्युत्पत्तिवाक्यसिद्धावनूद्य प्रक्षेपो विधीयते। उपस्तरणाभि
घारणाभ्यां च सह चतुरवत्तं प्राप्तमिति यथाप्राप्तानुवादात्सैवोपस्तरणाभ्यां चतुरवत्तं। यद्यपि
होमांगतया चतुरवत्तविधिः तथाप्यवत्तमात्रं विधीयते न चतुःसंख्या चान्तरप्राप्तानुवादत्वे
नापि संभवतो विधाने गौरवापत्तेः। यद्यपि संख्या होमांगतया विधीयते तथापि साधनमा
त्रपरिच्छेदेनांगत्वोपपत्तेराज्यस्यापि च संस्कारद्वारेण होमसाधनत्वादुपस्तरणाभिघारणा
भ्यां चतुरवत्तमिति प्राप्नीयते। एवं चतुरवदानस्य पाक्षिको बाधो न कल्पितो भवति। १२। सास
दश्यवन्निपम्यत। रू लाचिंतेयं। यदा चतुःसंख्या होमांगतया विधीयते तदा किमाज्यद्रव्यक उपां
शुयाजे चतुरवदानं कर्तव्यं नेति संशये चतुरवत्तं विहितं कथं संपादनीयमित्यपेक्षायामुपस्त
रणादिप्रकारविधानात्तस्य च केवलसान्नाय्यौषधविषयत्वात्तत्रैव चतुरवदानमुपसंह्रियते
सान्नदश्यवदिति प्राप्त उच्यते। चतुरवत्तमविशेषविहितं सर्वहोमांगं। न च तल्लेपत्वेनोपस्तरणा
दिविधिः। हविःसंस्कारार्थतयात्तूपस्तरणाभिघारणे विहिते। ताभ्यामेव सान्नाय्यौषधयोश्च राम
तुरवत्तसंपत्तेर्न हविष्यश्चतुरवदीयते यत्र त्वाज्य उपस्तरणादिनश्रुतं तत्रान्यतः संपत्स्यमानाद्ध ५६
विष एव चतुरवदानं। परमार्थस्तु नात्र चतुःसंख्या विधीयते। अन्यपरवाक्यानुवादत्वेना

पि संरुवं त्यं विधानस्यान्याय्यत्वात्। अतो वृत्तानुवादेन होमविधिर्न होमांगतया वत्तविधिः।
उपांशुयाजान्वेव चतुर्गृहीतं जुहोतीति वाक्यात् चतुर्गृहीतविधिर्न चतुरवत्तवाक्यात्॥१२॥ पुरोडाशा
भ्यामित्यधिकृतानां पुरोडाशयोरुपदेश [illegible] त्वात् द्वैध्यस्तोमवत्। दर्शपूर्णमासयोः श्रूयते पुरोडा
शाभ्यामेवासोमयाजिनं याजयेद्यावेतावाग्नेयश्चैन्द्राग्नश्च सान्नाय्येन तु [illegible]सोमयाजिनमिति। तत्र पुरो
डाशाभ्यामेवासोमयाजिनमिति किमयं विधिरुतानुवाद इति संशयः। विधित्वे बहवः पक्षाः। अधि
कृतोपदेश इत्येकः। कर्मान्तरविधिरित्यन्यः। याजनविधिरित्यन्यतरः। कालोपदेश इत्यपरः। आग्ने
यस्यानुवादः ऐन्द्राग्नस्य पौर्णमास्यां विधिरित्यन्यः। तत्रार्थवत्वाद्विधिः। अनुवादस्यानर्थक्यात्।
तत्राधिकृतविधिः पुरोडाशाभ्यामेवासोमयाज्ये[illegible]वाधिक्रियते न सान्नाय्येन न वा सोमयाजीति। तद
युक्तं। समस्ताभ्यां हि दर्शपूर्णमासाभ्यां चोदितं फलं न केवलाभ्यां पुरोडाशाभ्यामसोमयाजिन उत्प
न्नुमर्हति। नापि नित्ययोः पुरोडाशयोरनित्यमसोमयाजिनं प्रतिसंभवति विधिः। तस्मात्कर्मान्तरेण
ते विधीयेते नैवं। प्रकृतप्रत्यभिज्ञानादेवकारानर्थक्याच्च। याजनविधिस्तर्हि भवतु। न फलाश्रवणात्।
परस्मैपदनिर्देशाच्च न फलकल्पनापि शक्यते। तेन कालविधिरेव न्याय्यो यानूसोमयागकाले पुरोडाशावि
ति। तदपि न चतुरस्रं। सान्नाय्यवैकल्पिको ह्येन्द्राग्नः सान्नाय्यं चनासोमयाजी सन्नयेदिति वचनादसोमया

इव्याजेनोपायतया प्राप्तस्य याजनस्य विधिरनर्थक इत्यप्यत्र दूषणं ज्ञेयं २

ग कालान्तरतः प्रवर्त्तते। तेन तद्धेकल्पिकस्यैंद्राग्नस्य प्राक्कालः प्राप्त एवेति तद्विधिर्व्यर्थः। तस्माद
नेर यस्य पर्वद्वयेपि प्राप्तत्वादनुवादः। ऐंद्राग्नस्य त्वमावास्यायां विहितस्य पौर्णमास्यामप्राप्तविधि
रितियुक्तं। एवकारानर्थक्यात्समुच्चितयोश्च पुरोडाशयोरेकेन लिङ्। शब्देन कस्यचिदनुवादः कस्य
विद्विधिरिति वैषम्यमयुक्तं। तस्मात्पूर्वोक्त एव कालविधिरस्तु। न च प्राप्तः कालः सान्नाय्यं ह्य
विद्धि विधिरिति। पागूर्ध्वं च सोमात्सान्नाय्यस्य काल एवेति तद्धेकल्पिकस्यै
पि५ सोमयाजिनो विहितं तदुसन्नयेदिति। पा तन्नियमाच्च प्राक्सोमादैंद्राग्नसान्नाय्ये वि
द्राग्नस्योभयोः प्राप्तौ संभवत्यां प्राक्काल एवं नियम्यते। तन्नियमाच्च प्राक्सोमादैंद्राग्न सान्नाय्ये वि
कल्पेते पश्चात्तु सान्नाय्यमेव भवतीति युक्तः कालविधिः। नैवं। असोमयाजिना कालो लक्ष्यते
न चैतद्युक्तं। तस्मात्सान्नाय्येन सोमयाजिनमित्यस्यायमर्थवादः॥१४॥ उपांशुयाजमंतरायज
तीति हविर्लिंगाश्रुतिलाद्यथाकामीप्रतीयेत। उपांशुयाजस्य द्रव्ये संदेहः किमर्थं प्रासंयत्किंचित्स्यादुता
ज्यमेव ध्रौवमिति। तत्र विशेषाश्रवणाद नियमः। आज्यस्यैव नाद्युपांशु पौर्णमास्यां यजन्नित्यस्यका
ल विधिपरत्वेन द्रव्यविधाव सामर्थ्यात्सर्वस्मै वा एतद्यज्ञाय गृह्यते यद्ध्रुवायामाज्यमित्यस्य चैवं शब्दोप राम
न रूस्य वर्तमानापदेशप्रसरूपस्य विधिसामर्थ्याभावादिति प्राप्ते ब्रूमः। यद्यपि तावद्विधिर्न स्यात्त ६०
थाप्यसंयुक्तो त्वन्नं ध्रौवमाज्यं प्रयोजनमपेक्षमाणमफ्न तद्द्व्येकेषु जातेषु यागेषु द्रव्याकां
ननु तावच्च लाविति पुराकल्पार्थवादो नीतीयाधि विधौ तु लडुद्दिश्य सर्वस्मै इत्यनेन ध्रौवतामाज्यं
चिस्यादिसूल आह आज्यस्यैवेति। उत्तराधिकरणेस्य कालमात्रविधित्वेन ध्यलइत्यर्थः। असकृत्तर्हि सर्वस्मै इति वा

ननु षष्ठे देवताक्षेपो निरस्तः इति गतार्थत्वान्न पुनः पूर्वपक्षोत्थानं संभवतीत्युच्यते। तत्र देवताक्षेपो निरस्तः न हि तेन वि
नायागविधेरप्रामाण्यमापद्यते मुख्यदेवतया तु चैपनेः। इह तु देवतां विना यागानुष्ठानायोगाद्यागविधेरेवाप्रामा
ण्यापत्तेर्देवताक्षेपो भविष्यतीति युक्तः पूर्वः पक्षः ५
क्षेषु निविशते। किमुत यदा विस्पष्टं तादर्थ्यं चतुर्थीसंयुक्तं विपरिणामलब्धविधिसामर्थ्यं
सर्वस्मै वा एतदिति वचनमेव विद्यते। तस्माद्धो वाजमस्य द्रव्यं ॥१५॥ तद्वच्च देवतायां स्यात्॥
उपांशुयाजस्यैव देवतायां संदेहः। किमर्थाम्नाया काचिदनियमेन स्यादुतास्ति कश्चिन्नि
४ य यम इति। तत्र विष्णुरुपांशु [illegible] व्योजामि लाप्यत्वादेरर्थवादत्वादन्यस्य च देवताविधेरदर्शि
नादनियमः। नाविदिताद्देवता भवति। तस्माद्देवतापेक्षो यमुपांशुयाजविधिः प्रकरणवशा
द्दर्शपूर्णमासतंत्रगताग्निरेकवाक्यतां यातीति नायमः ॥१६॥ धर्मार्था स्यात्प्रजापतिः॥ तां नि ६
त्रिकोदेवता इति स्थिते कातासामिति चिंत्यते। देवताविचारसमानहेतुत्वाच्च कालविचा
रोपि सहैव तेन क्रियते। तदयमत्र विचारः किं प्रजापतिर्देवतोताग्निरुत विष्णुरमावास्यायां
चोपांशुयाजः किं वोभयोः पर्वणोर्विष्णुः प्रजापतिरग्नीषोमौ च व्यवस्थितविषया देवताः य
दामावास्यायां तदा विष्णुः पौर्णमास्यां तु प्रजापतिरग्नीषोमौ चेति। अथवा पौर्णमास्यामे
वोपांशुयाजो विध्याघास्यति तत्रापि देवतास्तत्रैव विकल्प्यंत इति। तत्र धर्मसंप्रतिपत्तेः प्रजा
पतिर्देवतेति गम्यते। स हि यत्किंचित्प्राजापत्यं यज्ञे क्रियते उपांश्वेव तत्क्रियत इति वचनादु
सिद्धांतमाह नेति। न लोके काचिद्देवता नाम जातिरूपेण प्रसिद्धास्ति येन तद्व्यगुणाद्देवतात्वं तु यायत्रोद्देश्यत्वेन
न विधीयते सा देवता यथा यद्वेदने एसा धनत्वेन विधीयते स धन इति। ८

पांशुधर्मता। यागोपिचायं तद्धर्मेति प्राजापत्यत्वाध्यवसानं। नच प्रजापतिरुपांशुध
र्मीत्युक्तानावस्तस्यधः प्रजापतिं मनसाध्यायेदिति विधेः। तदर्थवादस्त्वयं यत्किंचित्प्राजा
पत्यमिति। तस्मात्संप्रति पत्यनावान्न प्रजापतिः। मुख्यत्वात्त्वग्निः स्यात्सोपिन। विष्णुस्त
60| मंत्रवर्णात्स्यादाग्नेयैंद्राग्नयाज्यानुवाक्यायु [illegible]
गुलयोर्मध्ये वैष्णवं याज्यानुवाक्यायुगुलमाम्नातं। यागश्चायं पुरोडाशद्वयमध्ये। विहित
माद इति स्थानसाम्याद्वैष्णवमंत्रद्वयमस्यांगं भवद्विष्णुं देवतां परिकल्पयति। आग्नेयैंद्राग्नमध्यव
र्तित्वाच्च मंत्रयोरमावास्याकालत्वावगमाद् विशेषविहितोपियागो मंत्रवशादमावास्याकालइ
ति निश्चीयते। सत्यं मांत्रवर्णिकी देवता न तु विष्णुरेव। मंत्रवशाद्वस्तुतिस्तोपि देवताव्यवस्थितवि
कल्पेन स्यादुरुनयो श्च पर्वणोरुपांशुयाजः स्यात्। तथाहि। जामि वा एतद्यज्ञस्य क्रियते यदन्वंचौ
पुरोडाशावुपांशुयाजमंतरा यजत्यजामित्वायेत्य विशेषेण पुरोडाशद्वयलक्षिते काले विधाना राम
दुभयोश्च पर्वणोः पुरोडाशद्वयसंभवादुभयत्रोपांशुयाजः स्यात्। नन्वमावास्यायां जामिता ६९
दोषः पाक्षिकः सोमयाजिन ऐंद्राग्नाभावात्॥ तुल्यं पौर्णमास्यामपि पाक्षिकत्वं अ सोमयाजिनो ऽ

कर्मणो रूपं देवता न कालः तेनांतरंगदेवताविधिसंभवेन बहिरंगकालविधिर्न न्याय्यः तस्माद्देवतामात्रविधौ कालकृत [illegible]
वा स्यात् पौर्णमासी क्रमेणामावास्या क्रमेण च याज्यानुवाक्यापाठस्तत्र [illegible] कालद्वयस्य नि [illegible] धकमस्त्रासांघलाघनमतमुप
न्यस्यतीत्याहेति ॥ १ ॥

प
ग्नीषोमीयाभावात् । तस्मात्पाक्षिकेनैव ज्ञामित्वानिये [illegible] नोक्तयत्रार्थवाद इत्युक्तयत्रा प्युपां स्रु याजः स्यात् । तत्रता व ब्रूतामग्नीषोमावाज्यस्यैव नाकुर्पांशु पौर्णमास्यां यजन्नित्यनेन वचनेन । खा ५
पौर्णमासीकालवर्त्तिनोऽग्नीषोमदेवताविधानान्मंत्रवर्णाच्च स्याताम् अग्नीषोमौ । प्रजापतिश्च मंत्रवर्णात् स्यात् । आग्नेयाग्नीषोमीययाज्यानुवाक्यामध्ये तैत्तिरीयाणां प्राजापत्ययाज्यानुवाक्या
म्नानात् । विष्णुस्तु पूर्वोक्तेन न्यायेनामावास्यायां स्यादिति प्राप्ते ब्रूमः । वि [illegible] घा देवताः समंत्रवर्णाद् विकल्पिताः । ननु कालद्वये यागः पौर्णमासी प्रति वाक्यतः । उपांशु पौर्णमास्यां यजन्नि
त्यनेन पौर्णमासीविधानात् पौर्णमास्यामेव स्यात् कालविधानं हि तन्न देवताविधानं मंत्र
वर्णाद् देवदेवतानां लब्धत्वात् । पौर्णमासीकालविशिष्टयागानुवादेन देवताविधौ विशिष्टा
नुवाददोषापत्तेः । तस्मादुपांशुयाजानुवादेन कालविधानमेतत् ॥ अग्नीषोमग्रहणं तु मंत्रव
र्णिकीनां देवतानामुपलक्षणार्थं पौर्णमास्यां [illegible] लापनाः कालविधिमनिच्छंतः पर्व [illegible] द्वयेऽप्युपांशु
याजमाहुस्तेः कथमिवत्रयोदशामावास्यायामिति लिंगं समर्थयेरन् कालविध्यभावे च पौर्ण
मासी वाक्येन नानुवादात् संतु वा पूर्णमासशब्देनापि न फले विनियुज्यते ति प्राधान्यमुपांशुयाज

सर्वट्कारादयमीमांसानुक्रमितिसंख्येयम्

सिद्धांतेति। नि सवसवनेनप्रधा नादिति। द्वितीयसंख्याधिकर संख्याप्रय

वदंगतास्यादि १ नयागविधिनाविरोधादंगभूतस्य कालस्य विधिः ... तइत्यर्थः ५
णेएतदुक्तं नाख्यानमात्रं प्रमाणं येन यागविध्युत्तरं कालेति तत्र आकृती
जेकादशालवदत्यासेननीयेतसंख्यां गृहीलैवव्याख्यानं यागविधत्त इति कर्मत्ते दएवेति। एवमानिसवश्रुतंकाल

स्य न स्यात्॥ आज्यभागादिव्यस्तांतावत्। तस्मात्सौर्णमासीकालस्य वाचनिकत्वात्स्वधा
नानुवर्त्तित्वाच्च देवतानां तिसृणामपि तत्रैव विकल्पः॥ १९॥ ॥ त्रिपुरोडाशायां स्यादंतराल
र्थलात्॥ ॥ पौर्णमास्यामेवोपांशुयाज इति स्थिते चिंत्यते। किं त्रिपुरोडाशायामेव स्या
दुतैकपुरोडाशायामपीति। तत्रैकपुरोडाशायामंतरालगुणलाभेनवैगुण्यात् त्रिपु
रोडाशायामेव स्यात्। सिद्धांते कदेशीलाह। यागस्याविशेषणाश्रवणाद् द्वयत्रानुष्ठानं।
गुणस्तु यदा त्रिपुरोडाशा तदा भविष्यतीति। तदयुक्तं। विधीयमान एव यागोंतरालगु
णविशिष्टो विधीयते। अनुपादेयश्चांतरालगुणः। तेन यत्रैवायं गुणः तत्रैवास्य विधिरिन
रत्र तु विधिरेव नास्तीति अकर्त्तव्य एवेति प्राप्ते विधीयते। स्यादेवमंतरालस्य गुणत्वेन
विधिर्यदि। कालो विधीयते तत्र पुरोडाशोपलक्षितः। अन्यार्थाभ्यां हि पुरोडाशाभ्यामुप
लक्षिते काले कर्म विधीयते यो यं पुरोडाशयोर्मध्य कालस्तत्रोपांशुयाज इति। सर्वत्र चोप
लक्षणाय उपलक्षणीयमवतिष्ठते। शंखवेलायामागंतव्यमित्यादौ। तेन कर्मांगभूतस्य
सिन्नसत्त्वे वाधिकरोतिनान्यत्तेतिपञ्चमे स्थितं तस्माद् अनुपादेय इति। ८

ज्योतिर्होतेति मालोचैव

क्रमः

आग्नेयोत र:३

राम ६२

62

कालस्यैकपुरोडाशायामपिलाम्नात्तत्राप्युपांशुयाजेन बाधितव्यः॥१८॥ ॥तदेवं लुप्ता
र्थे यदपि च निषिद्धं विकृतिषु तथा प्रत्याम्नातं त्रिविधमिह बाध्यं व्यवसितं। अतस्त्वन्यस्या
भ्युच्चयविधिरियत्येवमुदिता प्रयोगेयत्तायास्त्वत उपरि चिंतां प्रकुरुते॥ ॥इति श्रीपार्थ
सारथिमिश्रविरचितायां शास्त्रदीपिकायां दशमस्याध्यायस्याष्टमः पादो दशमाध्याय
श्च समाप्तिमगमत्॥ ॥शुभमस्तु॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

63

राम
६३

पत्रे ६२

श्रीगोरक्षाशास्त्रदीपिका टले

६३



१०